E-ISSN-2584-2870 DOI: https://doi.org/10.65833/dbs.2026.003

देवभूमि-सौरभम्
Devabhūmisaurabham

Vol 2 Issue 2 July-Dec 2025 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# हेत्वाभाससामान्यलक्षणविमर्शः

**प्रो.महेशझा**

**न्यायवैशेषिक-एवं-दर्शनविभागाध्यक्षः**
**केन्द्रीयसंस्कृतविश्वविद्यालयः**
**श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः**
**दूराभाषसंख्या-9337197315**
**अणुवाक्संख्या- drmaheshjha@gmail.com**

**शोधसारः**

मानाधीना मेयसिद्धिः इति सिद्धान्तस्य सर्वसम्मतत्वात् समेषामेव प्रमेयवस्तूनां याथार्थ्यं प्रमाणबलेनैव साधयितुं शक्यते, तच्च प्रमाणं प्रत्यक्षानुमानोपमानशब्दभेदेन न्यायशास्त्राभिमतं चतुर्विधम्। तत्रापि प्रमाणचतुष्टयमध्ये अनुमानप्रमाणस्य प्राधान्यं दृश्यते। तच्चानुमानम् अनुमितौ करणं, तच्च करणं व्याप्तिज्ञानस्वरूपं, तद्व्यापारत्वेन समुत्पन्नात् परामर्शात् अनुमितिः समुत्पद्यते। तया एव अनुमित्या प्रत्यक्षप्रमाणेन अनवगतानां पदार्थानां ज्ञानं भवितुमर्हति। तत्रानुमाने यथा व्याप्तिपक्षधर्मताविशिष्टहेतूनामुपयोगिता आवश्यकी तथैव व्याप्तिपक्षधर्मतारहितानामसद्धेतूनां परिज्ञानमपि परमावश्यकम्। यदि असद्धेतुसंज्ञकानां हेत्वाभासानां ज्ञानं न जायते तर्हि वाद्युद्भावितेषु पक्षेषु दोषोद्भावनं नहि कर्त्तुं शक्यते न वा स्वपक्षस्थापनार्थं सद्धेतूनां प्रयोगः कर्त्तुं शक्यते। यतो हि दुष्टहेतुभिन्नानां व्याप्तिपक्षधर्मताविशिष्टहेतूनामेव यथार्थतत्त्वसाधनक्षमत्वम्। इत्थं सर्वत्र तत्त्वनिर्णयार्थं विजयार्थं च हेत्वाभासपरिज्ञानं परमावश्यकम्। वस्तुतः निग्रहस्थानेषु अन्यतमोऽयं हेत्वाभासः निग्रहस्थानेभ्यः वहिरपि पृथक्पदार्थत्वेन अङ्गीकृतः। यद्यपि प्रतिवादिविजयाय निग्रहस्थानानि सर्वत्र समाश्रयन्ते किन्तु अन्यनिग्रहस्थानापेक्षया प्राचुर्येण आचार्य्यैः हेत्वाभास एव प्रयुज्यते। न्यायालयेऽपि वादिप्रतिवादिनोः मध्ये विजयाभिलाषिपुरुषः हेत्वाभासानां ज्ञानमधिगम्य तज्जन्यदोषैः स्वीयरक्षामथ च स्वविरोधिना प्रयुक्तेऽनुमाने हेत्वाभासानां समुद्भावनं कृत्वा अन्यं पराजेतुं शक्नोति। हेतोराभासाः हेत्वाभासाः तथा हेतुवदाभासन्ते प्रतीयन्ते इति हेत्वाभासाः इत्युभाभ्यामेव व्युत्पत्तिभ्यां हेत्वाभासपदार्थः ज्ञायते। तत्र प्रथमव्युत्पत्तिलभ्यं हेत्वाभासपदं हेतुदोषपरकम्। द्वितीयं च दुष्टहेतुपरकम्। तादृशदोषविशिष्टः हेतुरेव हेत्वाभासपदवाच्यः। प्रस्तुतशोधपत्रे तस्य हेत्वाभासपदस्य किं स्वरूपम्। तस्य साधारणं लक्षणं किमिति सपदकृत्यं विस्तरेण चिन्तामणि-दीधिति-गादाधरीशास्त्रोक्तदिग्भिः प्रतिपादितमस्ति। तत्र चिन्तामणिकारोक्तहेत्वाभासलक्षणेषु कथमव्याप्तिप्रभृतयः दोषाः जायन्ते परिष्कारपूर्वकं तत्परिहारः लक्षणान्तरस्वीकारे बीजप्रदर्शनञ्च टीकाकाराः कथं कुर्वन्तीत्यपि

प्रतिपादितो वर्त्तते। इत्थं शोधपत्रेऽस्मिन् विभिन्नदार्शनिकानां मते हेत्वाभासवैविध्यं तथा तेषां संख्याभेदः एवं नव्यन्यायदिशा हेत्वाभाससामान्यलक्षणानां स्वरूपकथनं तेषां परिष्काराश्च सविस्तरेण प्रतिपादिताः वर्त्तन्ते।

**कूटशब्दाः**

अवच्छेदकत्वम्, अवच्छिन्नत्वम् प्रतियोगिता, अनुयोगिता, वृत्तित्वम्, सामानाधिकरण्यम्, निरूपितत्वम्, निरूपकत्वम्, प्रामाण्यम् प्रकारता, विशेष्यता, प्रतिबन्धकत्वम्, प्रतिबध्यत्वम्, आधेयत्वम्, अधिकरणत्वम्, अनाहार्य्यम्, अनास्कन्दितम्।

## भूमिका

आत्मतत्त्वस्य परिज्ञानं परमपुरुषार्थभूतमोक्षसाधनम्। तच्च अनुमानबलेनैव कर्त्तुं शक्यते। तच्चानुमानं यथा व्याप्तिविशिष्टपक्षधर्मताज्ञानसाध्यं, तथैव हेत्वाभासज्ञानसाध्यम्। सद्धेतुज्ञानेन यथा तत्त्वनिर्णयः विजयश्च जायते तथैव दुष्टहेतुपरिज्ञानमपि तत्त्वज्ञाने विजये च प्रयोजकम्। अत एव व्याप्तिपक्षधर्मताविशिष्टहेतुनिरूपणानन्तरं हेत्वाभासनिरूपणप्रयोजनकथनावसरे “अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते” इत्युक्तं गङ्गेशोपाध्यायैः[१]।

**हेत्वाभाससामान्यलक्षणम्-**

दोषलक्षणं विना दुष्टलक्षणासम्भव इति मनसि निधाय एव मणिकृद्भिः हेत्वाभाससामान्यलक्षणं प्रोक्तम्- “तत्रानुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्”[२] इति। तत्र पदेन अत्र निरूपणविषयीभूतहेत्वाभास एव अभिप्रेतो वर्तते। तथा चानुमितेः कारणस्वरूपो योऽभावः तत्प्रतियोगि यत् यथार्थज्ञानं तादृशज्ञानविषयता यत्र वर्तते स हेत्वाभास इत्यर्थः लभ्यते। अनुमितिं प्रति यथा परामर्शादिकं कारणं भवति तथैव व्यभिचारादिहेत्वाभासनिश्चयाभावोऽपि कारणं भवति, व्यभिचारादिनिश्चयस्यानुमितिम्प्रति प्रतिबन्धकत्वात्। तथा च “अयोगोलकं धूमवत्” इत्याकारकानुमितिम्प्रति धूमाभाववद्वृत्तिर्वह्निरित्याकारकव्यभिचारनिश्चयः प्रतिबन्धकः, प्रतिबन्धकाभावरूपेण तस्याभावः अनुमितिं प्रति कारणं भवति। एवञ्चानुमितिकारणीभूताभावपदेन व्यभिचारनिश्चयाभावस्य ग्रहणात् तत्प्रतियोगियथार्थज्ञानं "धूमाभाववद्वृत्तिर्वह्नि"रित्याकारकव्यभिचारज्ञानं, तद्विषयत्वस्य धूमाभाववद्वृत्तिर्वह्नौ सत्वात् व्यभिचारे भवति लक्षणसमन्वयः।

एवमेव ह्रदपक्षकवह्निसाध्यकपटत्वहेतुक ह्रदो वह्निमान् पटत्वादित्यत्र “वह्न्यभाववद्ध्रदात्मकबाधे इत्थं लक्षणसमन्वयः- ह्रदो वह्निमानित्यनुमितिम्प्रति वह्न्यभाववान् ह्रद इति बाधनिश्चयस्य प्रतिबन्धकतया, प्रतिबन्धकाभावस्य कारणत्वमितिरीत्या तदभावस्य तादृशानुमितिम्प्रति कारणतया ह्रदो वह्निमानित्यनुमितेः कारणीभूतो यो वह्न्यभाववान् ह्रद इति बाधनिश्चयाभावः तत् प्रतियोगि यत् वह्न्यभाववान् ह्रद इत्याकारकं बाधनिश्चयात्मकयथार्थज्ञानं तद्विषयत्वस्य वह्न्यभाववद्ध्रदात्मके बाधे सत्वादिति। एवमेव “वह्न्यभावव्याप्यवद्ह्रद” रूपे सत्प्रतिपक्षे इत्थं समन्वयः- अनुमितिकारणीभूताभावः- “वह्न्यभावव्याप्यजलवान्ह्रदः” इत्याकारकसत्प्रतिपक्षनिश्चयाभावः, तत्प्रतियोगि यत् यथार्थज्ञानं- “वह्न्यभावव्याप्यवान् ह्रद” इत्याकारकसत्प्रतिपक्षनिश्चयात्मकं ज्ञानं, तादृशज्ञानविषयत्वस्य “वह्न्यभावव्याप्यवद्ध्रद”रूपे सत्प्रतिपक्षे सत्त्वात् भवति लक्षणसमन्वयः। एवमेव वह्नि-असमानाधिकरणपटत्वरूपे विरोधे इत्थं लक्षणसमन्वयः- यतो हि तादृश-उपर्युक्तपरामर्शं प्रति वह्न्यसमानाधिकरणपटत्वस्वरूपविरोधनिश्चयस्य प्रतिबन्धकतया, तादृशविरोधनिश्चयाभावस्य( वह्निव्याप्यपटत्ववान्ह्रद इति परामर्शं प्रति) कारणत्वेन, तादृशानुमितिकारणीभूताभावः

तादृशविरोधनिश्चयाभावः तत्प्रतियोगि यत् विरोधनिश्चयरूपं यथार्थज्ञानं, तादृशयथार्थज्ञानविषयत्वस्य "वह्न्यसमानाधिकरणपटत्व" रूपे विरोधे सत्वात् भवति हेत्वाभासलक्षणसमन्वयः। एवमेव "पटत्वाभाववत्ह्रद"स्वरूपस्वरूपासिद्धौ इत्थं लक्षणसमन्वयः- तादृशानुमितिजनकीभूतपरामर्शं प्रति पटत्वाभाववद्ह्रदरूपस्वरूपासिद्धिनिश्चयस्य प्रतिबन्धकतया तादृशस्वरूपासिद्धिनिश्चयाभावस्य कारणतया, तादृशानुमितिकारणीभूतः यः अभावः तादृशस्वरूपासिद्धिनिश्चयाभावः, तत्प्रतियोगितादृशस्वरूपासिद्धिनिश्चयात्मकं यथार्थज्ञानं, तद्विषयत्वस्य "पटत्वाभाववत्ह्रद"रूपस्वरूपासिद्धौ सत्त्वात् भवति लक्षणसमन्वयः।

लक्षणेऽनुमितिपदस्यानुमितिसामान्यपरत्वेऽसम्भवः, घटपटाद्यावदनुमितौ कस्यापि एकस्य निश्चयस्य प्रतिबन्धकत्वाभावात्। यत्किञ्चिदनुमितिपरत्वे पर्वतो वह्निमान् धूमादित्यत्र ह्रदो वह्निमानित्यनुमितेर्धर्तुं शक्यतया वह्न्यभाववान् ह्रद इत्यस्य दोषतापत्तिरूपातिव्याप्तिः। अतः लक्षणे प्रकृतपक्षसाध्यहेतुकानुमितिपरत्वमावश्यकम्।[3] तथा च "प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताशाल्यनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वमि"ति फलितम्।

अत्र अनुमितिपदं यदि अनुमितिनिष्ठकार्यतापरं तदा व्यभिचारादावव्याप्तिः। पर्वतो धूमवान् वह्नेरित्यत्र व्यभिचारनिश्चयस्याभावस्यानुमितिकारणीभूताभावपदेन ग्रहीतुं न शक्यते, व्यभिचारनिश्चयस्यानुमितेरप्रतिबन्धकत्वात्। व्यभिचारनिश्चयस्य व्याप्तिज्ञानं प्रत्येव प्रतिबन्धकत्वम्। लक्षणया यदि अनुमितिपदमनुमितिजनकज्ञानपरमुच्यते तदा ह्रदो वह्निमान् धूमादित्यत्र वह्न्यभाववद्ह्रदात्मके बाधेऽव्याप्तिः, बाधज्ञानस्य परामर्शाप्रतिबन्धकत्वात्। बाधज्ञानन्त्वनुमितिं प्रत्येव प्रतिबन्धकं न तु व्याप्तिज्ञानं प्रति। अतोऽनुमितिकारणीभूताभावपदेन बाधनिश्चयाभावस्य ग्रहणं भवितुं नार्हति। अत एवोक्तं दीधितिकारेण- "अनुमितिपदमनुमितितत्करणान्यतरपरमिति"।[4] तथा च न पूर्वोक्तदोषः। लक्षणस्वरूपं चेत्थं लभ्यते "पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताशाल्यनुमितिनिष्ठकार्यतासाक्षात्कारजनकसाक्षात्कारविषयताश्रयग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वं हेत्वाभासत्वमि"ति ।

सत्यप्येवं पर्वतो वह्निमान् धूमादित्यत्र "पर्वतो वह्निमान् ह्रदश्च तथा" इत्यनुमितिं गृहीत्वा तादृशानुमितिनिष्ठकार्यतासाक्षात्कारजनकसाक्षात्कारविषयताश्रयग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वस्य वह्न्यभाववद्ध्रदात्मके बाधे सत्त्वादतिव्याप्तिः। एतादृशातिव्याप्तिवारणार्थं यदि तादृशग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वमिति लक्षणं स्वीक्रियते तदा सर्वत्राऽसम्भवः। बाधनिश्चयनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यताया अनुमितावेव सत्त्वात्। व्यभिचारनिश्चयनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यतायाः परामर्शे सत्त्वात्। तादृशग्रहत्वस्योभयत्राऽसत्त्वात्, तादृशप्रतिबध्यतायां तादृशग्रहत्वव्यापकत्वाभावात्(अन्यूनानतिरिक्तधर्मस्यैवावच्छेदकत्वनियमात्) तादृशग्रहत्वावच्छिन्नप्रतिबध्यतायाः अप्रसिद्ध्या सर्वत्राऽसम्भवः। एतादृशदोषनिवारणार्थं कल्पान्तरमाह दीधितिकारः- "साध्यव्याप्यहेतुमान् पक्षः साध्यवान् इत्याकारानुमितिपरं वा"[5] इति। तथा च लक्षणस्वरूपम्- "पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितहेतुतावच्छेदकावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारताशाल्यनुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वमि"ति। तथा च नोक्तासम्भवादिदोषः। पर्वतो धूमवान् वह्नेरित्यत्र समन्वयश्चेत्थम् अनुमितिः पर्वतो धूमवान् धूमव्याप्यवह्निमांश्चेति, तादृशानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता "धूमाभाववद्वृत्तित्वविशिष्टवह्नि"रूपव्यभिचारे, प्रतिबन्धकताशालियथार्थज्ञानविषयत्वस्य तादृशव्यभिचारे सत्त्वादिति।

अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वं हेत्वाभासत्वमत्रानुमितिपदेन यदि शक्यार्थं गृहीत्वा पक्षविशेष्यक-साध्यप्रकारकानुमितिर्गृह्यते तदा व्यभिचारेऽव्याप्तिः एवं लक्षणया कारणत्वपरत्वे बाधेऽव्याप्तिः प्रतिपादितम्। एवमनुमितिनिष्ठकार्यता-निरूपितसम्बन्धित्वेन लक्षणयाऽनुमितिपदस्याऽनुमितितत्करणान्यतरपरत्वे लक्षणावृत्तिस्वीकारः कर्त्तव्यः। यद्यनुमितिपदस्य शक्यार्थ-मादाय हेत्वाभासलक्षणं सम्भवति तदा लक्षणा नाभ्युपेया, इति मतमवलम्व्याचार्याभिमताऽनुमितिपरत्वं प्रदर्शितं "साध्यव्याप्यहेतुमान् पक्षः साध्यवानित्याकारानुमितिपरं वा" इति।

अत्र यद्यनुमितेराकारः साध्यव्याप्यहेतुमान् पक्षः साध्यवानित्याकारकता स्वीक्रियेत तदा यत्र पक्षतावच्छेदकावच्छेदेन अर्थात् ह्रदत्वावच्छेदेन वह्न्यादेः साध्यता, तत्रापि एतल्लक्षणानुसारमनुमितिस्वरूपं "वह्निव्याप्यधूमवान् ह्रदो वह्निमान्" इत्याकारकम्। सा चानुमितिः पक्षांशेऽवगाहमानतया सामानाधिकरण्येनानुमितित्वमेव स्यात्। सामानाधिकरण्येनानुमितौ च सामाना-धिकरण्येन बाधस्य हेत्वाभासता न स्यादत दीधितिकृदभिमतमनुमितिस्वरूपमुपेक्ष्य गदाधरभट्टाचार्येण "प्रकृतपक्षतावच्छेदका-वच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपिता या साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितव्या-प्तित्वावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपितहेतुतावच्छेदकावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारताशाल्यनुमितित्वव्यापकप्र-तिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वम्" इति लक्षणं कृतम्। एवञ्च भट्टाचार्यमतानुसारं "ह्रदो वह्निमान् वह्निव्याप्य-धूमवांश्च" इत्याकारकानुमितिरेव लक्षणघटिका। तादृशानुमितेश्च प्रतिबन्धकतायाः सर्वत्र बाधव्यभिचारादौ सत्त्वाल्लक्षणसमन्वयः।

अत्रेदं विचिन्तनीयम्- आचार्य्याभिमतमनुमितिस्वरूपं लिङ्गोपधानमताभिप्रायकम्। अर्थात् लिङ्गोपहितं साध्यमस्या-मनुमितौ भासते। अत इयमनुमितिः "लिङ्गोपधानमताभिप्रायिका"। परन्तु पक्षविशेष्यिका साध्यप्रकारिका याऽनुमितिर्भवति सा मणि-कृदभिमता "लिङ्गाऽनुपधानमताभिप्रायिका"। अतएव दीधितिग्रन्थे "साध्यव्याप्यहेतुमान्पक्षः साध्यवानित्याकारानुमितिपरं वा" इत्येवमुट्टङ्कितम्। अत्र वाकारपदलेखनस्वारस्यान्नेयमनुमितिः मणिकृदभिमता इति सूचितं भवति। अनुमितिप्रतिबन्धक-यथार्थज्ञानविषयत्वं हेत्वाभासत्वमित्यत्र लक्षणेऽजहत्स्वार्थलक्षणयाऽनुमितिपदस्याऽनुमितिनिष्ठकार्यतानिरूपकसम्बन्धित्वेनानुमिति-तत्करणान्यतरस्वरूपत्वमभ्युपेत्य सर्वत्र बाधव्यभिचारादौ लक्षणसमन्वयः क्रियते। तथा च लक्षणस्वरूपम् "प्रकृतपक्षतावच्छेदका-वच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारताशाल्यनुमितिनिष्ठकार्यतासाक्षात्कारजनकसाक्षात्कारविषयताश्र-यग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वम्"। इत्थं लक्षणे निवेशे कृते च पर्वतो वह्निमान् धूमादित्यत्र वह्न्यभाववद्ह्रदेऽतिव्याप्तिः स्यात्। तथाहि पर्वतपक्षकवह्निसाध्यकाऽनुमितिनिष्ठकार्यताविषयको यः साक्षात्कारः पर्वतो वह्निमानित्य-नुमितिः परामर्शकार्यं ह्रदो वह्निमान् इत्यनुमितिश्च परामर्शकार्यम्, इत्येवं समूहालम्बनात्मकः कार्यतासाक्षात्कारः, तज्जनकपर्वतो वह्नि-मानित्यनुमितिसाक्षात्कार इव ह्रदो वह्निमानित्याकारकानुमितिसाक्षात्कारस्यापि जनकतया तदीयविषयताश्रयग्रहपदेन ह्रदो वह्नि-मानित्याकारकानुमितेरपि धर्त्तुं शक्यतया तन्निष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वस्य वह्न्यभाववद्ह्रदे सत्त्वात्। अतः तादृशकार्यताविषयकसाक्षात्कारत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकसाक्षात्कारीयविषयताश्रयग्रहनिष्ठप्रति-बध्यतैव निवेशनीयम्। एवञ्च पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताशाल्यनुमितिनिष्ठकार्यताविषयकसाक्षा-

त्कारत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयता नहि ह्रदविशेष्यकवह्निप्रकारकानुमितित्वाच्छिन्नविषयिता। अतो न तादृशोपस्थितिमादाय वह्न्यभाववद्ह्रदेऽतिव्याप्तिः।

एवं प्रत्येकं बाधव्यभिचारादावतिव्याप्तिवारणाय आचार्याऽभिमतानुमितिघटितं लक्षणमत्र कृतम्। तदनुसारं लक्षणस्वरूपम्-पक्षविशेष्यिका साध्यप्रकारिका साध्यव्याप्यहेतुप्रकारिका च याऽनुमितिः तादृशानुमितित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वमिति स्वीक्रियते।

अत्रेदं विचार्यते, प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितहेतुतावच्छेदकावच्छिन्नविषयताशाल्यनुमितित्वावच्छिन्नकार्यतावच्छेदकविषयत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वमित्येवं लक्षणं करणीयम्, भिन्न-भिन्नलिङ्गकपरामर्शाव्यवहितोत्तरजायमानानुमितौ परस्परजन्यबोधेऽनुमितिपरामर्शयोः कार्यकारणभावे कार्यतावच्छेदककोटौ तत्तत्परामर्शाऽव्यवहितोत्तरत्वस्यावश्यं निवेशनीयतया भवति कार्यतावच्छेदकविषयतापदेन परामर्शविषयतायाः अनुमितिविषयतायाश्च संग्रहः। एवञ्च ह्रदत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताशाल्यनुमितिनिष्ठकार्यतावच्छेदकीभूतविषयता ह्रदो वह्निमान् इत्याकारकानुमितिविषयता, तदवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयताश्रयत्वस्य वह्न्यभाववद्ह्रदे सत्वात् भवति लक्षणसमन्वयः।

एवं पर्वतः धूमवान् वह्नेरित्यत्र पर्वतविशेष्यकधूमप्रकारकवह्निहेतुकानुमितिनिष्ठकार्यतावच्छेदकविषयता "धूमव्याप्यवह्निमान्पर्वतः" इत्याकारकपरामर्शनिष्ठविषयता तादृशविषयत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वस्य धूमाभाववद्वृत्तिवह्निरित्याकारकव्यभिचारे सत्त्वाद् भवति बाधे व्यभिचारे च समन्वयः।

इत्थं सर्वत्र बाधव्यभिचारादावव्याप्तिवारणसम्भवेऽजहत्स्वार्थलक्षणामभिप्रेत्य "अनुमितिनिष्ठकार्यतासाक्षात्कारजनकसाक्षात्कारविषयताश्रयग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताश्रययथार्थज्ञानविषयत्वम्" अथवा आचार्य्याऽभिमतपरामर्शघटितानुमितिं कल्पयित्वा प्रत्येकं बाधव्यभिचारादावव्याप्तिवारणमसङ्गतमेव। यदि कार्यतावच्छेदकविषयत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वमित्येवं लक्षणं क्रियते तर्हि पर्वतो वह्निमान् धूमादित्यत्र घटाभाववत्पर्वतेऽतिव्याप्तिः। तत्र पर्वतो वह्निव्याप्यधूमघटवान् इत्येकद्वयमितिरीत्या घटत्वावच्छिन्नप्रकारतानिरूपिता या तादृशज्ञानीया विशेष्यता तस्या अपि वह्निव्याप्य-धूमनिष्ठप्रकारतानिरूपित-विशेष्यत्वाभिन्नतया कार्यतावच्छेदकविषयितापदेन घटनिष्ठप्रकारतानिरूपितपर्वतनिष्ठविशेष्यताया अपि धर्त्तुं शक्यतया तादृशविषयत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वस्य घटाभाववत्पर्वते सत्त्वादति-व्याप्तिः प्रसज्येत।

यदि च कार्यतावच्छेदकविषयत्वावच्छिन्नत्वस्थाने कार्यतावच्छेदकप्रकारत्वावच्छिन्नत्वं प्रतिबध्यतायां निवेश्य तद्दोषः परिह्रियते तथापि वह्निव्याप्यधूमवन्तौ पर्वतघटौ इति द्वयोरेकमितिरीत्या पर्वतघटोभयनिष्ठविशेष्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वस्य धूमाभाववत्घटेऽपि सत्त्वात्तत्रातिव्याप्तिः। यदि कार्यतानवच्छेदकविषयत्वानवच्छिन्नत्वं निवेश्य धूमाभाववत्घटेऽतिव्याप्तिर्वार्यते, तथाहि प्रकृतपक्षकप्रकृतसाध्यकप्रकृतहेतुकानुमितिनिष्ठकार्यतानवच्छेदकघटत्वावच्छिन्नप्रकारत्वावच्छिन्नत्वाद् भवति धूमाभाववद्घटवारणम्, तथापि ह्रदो वह्निमान् धूमादेतत्स्थलीयवह्न्यभावविशिष्टह्रदरूपबाधेऽव्याप्तिः। वह्न्यभाववद्ह्रदात्म-

कनिश्चयनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकत्वस्य महानसीयवह्नित्वावच्छिन्नप्रकारतायामपि विद्यमानत्वात्, तादृशप्रकारतायाश्च कार्यतानवच्छेदकत्वात्।

यदि च तादृशानुमितिनिष्ठकार्यतानवच्छेदकविषयताशून्यज्ञानीयविषयत्वावच्छिन्नत्वस्य प्रतिबध्यतायां निवेशं कृत्वा तद्दोषः वार्यते तदा सर्वत्र तादृशानुमितिनिष्ठकार्यतानवच्छेदकीभूतनिरवच्छिन्नविशेष्यताशून्यत्वस्य कुत्राप्यभावादसम्भवः प्रसज्येत। तथापि कार्यतानवच्छेदकविषयताशून्यपदेन कार्यतावच्छेदकविषयताविशिष्टान्यविषयताशून्यत्वं निवेश्य पूर्वोक्तदोषाः वारयितुं शक्यन्ते। अत्र विषयतावैशिष्ट्यं- स्वतादात्म्य, स्वावच्छिन्नत्व, स्वनिरूपितत्व, स्वनिरूपितावच्छेद्यत्व, स्वावच्छेद्यनिरूपितत्व, स्वावच्छेद्यनिरूपितावच्छेद्यत्वैतदन्यतमसम्बन्धेन। इत्थं प्रकारेणापि प्रथमलक्षणं परिष्कर्तुं शक्यते, इत्येवं केचन प्रतिपादयन्ति। अथ अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वमत्र लक्षणे पर्वतो वह्निमान् धूमादित्यत्र पक्षविशेष्यक-साध्यप्रकारकानुमितिप्रतिबन्धकज्ञानपदेन "वह्न्यभाववद्वृत्तिर्धूम" इत्याकारकभ्रमात्मकव्यभिचारज्ञानस्यापि अनुमितिप्रतिबन्धकतया तद्विषयस्य वह्न्यभाववद्वृत्तिर्धूमे सत्त्वादतिव्याप्तिः स्यात्। न हि केवलं वह्निमान् धूमादित्यत्र वह्न्यभाववद्वृत्तिर्धूमरूपव्यभिचारज्ञानेऽव्याप्तिः। अपि तु प्रेमयवान् वाच्यत्वादित्यत्र प्रमेयाभाववद्वृत्तिर्वाच्यत्वमित्याकारकभ्रमात्मकज्ञानविषयतायाः प्रमेयत्वाभाववद्वृत्तिरभिधेयत्वेऽपि सत्त्वात् तत्रापि व्यभिचारे प्रमेयत्वाभाववद्वृत्तिरभिधेयत्वेऽतिव्याप्तिः।

अत्रेयं जिज्ञासा जायते यत् वह्न्यभाववद्वृत्तिर्धूमरूपव्यभिचारे यदि यथार्थपदस्य व्यावृत्तिः सम्भवति तर्हि स्थलान्तरानुधावने किं नियामकम्? अत्रेदं वदामो यत् वह्न्यभाववद्वृत्तित्वं जलादौ प्रसिद्धम्, अत्र धूमे भ्रमः क्रियते परन्तु प्रमेयत्वाभाववद्वृत्तित्वं तु न हि कुत्रापि प्रसिद्धम् प्रमेयत्वस्य सर्वत्रविद्यमानतया तदभावस्याप्रसिद्धिः। अतः प्रमेयत्वाभाववद्वृत्तित्वस्याऽभिधेयत्वे प्रतिपादयितुं न शक्यते। किञ्च शिष्यबुद्धिवैशद्यार्थं भिन्न-भिन्नभ्रमस्वरूपप्रतिपादनार्थं हेत्वाभासग्रन्थे विभिन्नभ्रमः प्रदर्शितः। यथा प्रमेयः अभिधेयत्वादित्यत्र प्रमेयत्वाभाववद्वृत्तित्वमप्रसिद्धम्। अतः तमादाय भ्रमं प्रतिपादयितुं न शक्यते, अपि तु व्याप्तेः भिन्न-भिन्नरूपतया व्यभिचारस्यापि भिन्न-भिन्नस्वरूपताऽभ्युपेया। एवञ्च वह्न्यभाववद्वृत्तित्वस्य जलादौ प्रसिद्धतया तस्य धूमे भ्रमः क्रियते। प्रमेयत्वसाध्यकस्थले च प्रमेयत्वाभाववद्वृत्तित्वस्याऽप्रसिद्धतया नहि प्रमेयत्वाभाववद्वृत्तित्वस्य भ्रमः, अपितु "प्रमेयत्वमभिधेयत्वसमानाधिकरणाभावीयप्रतियोगितावच्छेदकम्" इत्याकारकव्यभिचारभ्रमं व्यवस्थापयितुं द्विविधभ्रमस्योल्लेखः।

अनयोर्भ्रमयोः व्याप्तिज्ञानविरोधित्वम्। परन्तु पर्वतपक्षकवह्निसाध्यकस्थले "पर्वतो वह्न्यभाववान्" इत्याकारकभ्रमोऽपि अनुमितिप्रतिबन्धकभ्रमज्ञानविषयः, एतल्लक्षणस्य बाधभ्रममादाय व्यभिचारभ्रममादाय चातिव्याप्तिर्प्रदर्शिता विद्यते।

अत्र यथार्थत्वं तद्वद्विशेष्यकत्वविशिष्टतन्निष्ठप्रकारताशालिज्ञानत्वरूपं ग्राह्यम्। अयथार्थत्वञ्च तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालिज्ञानत्वरूपम्। अत्र तावदनुगतभ्रमत्वं - स्वव्यधिकरणप्रकारावच्छिन्ना या-या विषयता तदनिरूपकत्वं कथञ्चिन्निर्वचनीयम्।

इत्थं लक्षणे यथार्थपदविशेषणमपि आवश्यकम्।[६] यथार्थपदानुपादाने पर्वतो वह्निमान् धूमादित्यादौ वह्न्यभाववत्पर्वतेऽतिव्याप्तिः। यतो हि पर्वतो वह्निमानित्यनुमितौ पर्वतः वह्न्यभाववानित्याकारकभ्रमात्मकनिश्चयाभावस्यापि कारणतया तत्प्रतियोगितादृशभ्रमविषयतायाः वह्न्यभाववत्पर्वते सत्त्वाद् दोषतापत्तिरूपातिव्याप्तिः। एवमेव "वह्न्यभाववद्वृत्तिर्धूम" इति

भ्रमात्मकव्यभिचारज्ञानाभावमादाय "वह्न्यभाववद्वृत्तिर्धूमे"ऽतिव्याप्तिः। एवं घटोऽभिधेयः प्रमेयत्वादित्यत्र "प्रमेयत्वाभाववद्वृत्ति अभिधेयत्वमि"ति भ्रममादाय तादृशाभिधेयत्वादौ अतिव्याप्तिः।[७] यथार्थपदोपादानेन एतादृशं ज्ञानं भ्रमात्मकं वर्त्तते अतो नातिव्याप्तिः।

एवं लक्षणे कृतेऽपि अनाहार्याऽप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टवह्न्यभावविशिष्टह्रदत्वावच्छिन्नविषयकत्वस्य जातित्वेन ह्रदत्वावगाहि "जातिमान् वह्न्यभाववान्" इत्याकारकज्ञानेऽपि विद्यमानतया तत्र च ह्रदो वह्निमान् इत्याकारकानुमितिप्रतिबन्धकताया अभावात् वह्न्यभावविशिष्टह्रदत्वस्य यद्रूपपदेन धर्त्तुमशक्यत्वात् वह्न्यभाववद्ह्रदेऽसम्भवः।

यदि पक्षतावच्छेदकनिष्ठविषयताभिन्नविषयत्वाप्रकारकत्वं निश्चये निवेश्यैतादृशदोषपरिहारः क्रियते तदा जलवान् वह्निमान् एतत्स्थलीयवह्न्यभाववज्जलवद्रूपबाधेऽव्याप्तिः। तत्र "जलवान् वह्न्यभाववान्" इति बाधनिश्चये पक्षतावच्छेदकीभूतजलनिष्ठविशेष्यतानिरूपितजलत्वनिष्ठप्रकारत्वानिरूपकत्वस्याभावात्, वह्न्यभाववद्जलवद्रूपबाधे पक्षतावच्छेदकांशेऽन्याप्रकारकत्वस्याभावात्।

यदि च लक्षणघटकीभूतविशिष्टाघटकपदार्थाविषयकत्वं दोषविषयकनिश्चये विशेषणीकृत्य "जलवान्वह्न्यभाववान्" इति बाधेऽव्याप्तिर्वार्यते तदा सर्वमाकाशवत् एतत्स्थलीयबाधेऽव्याप्तिः। आकाशाभाववत् सर्वरूपबाधात्मकविशिष्टाघटकपदार्थस्याऽप्रसिद्धत्वात्।

यदि च यद्यद्रूपावच्छिन्नस्य यस्य-यस्य तादृशविशिष्टघटकता तत्तद्रूपावच्छिन्नत्वतत्तन्निष्ठविषयताभिन्नकिञ्चिदवच्छिन्नविषयताशून्यत्वं ज्ञाने निवेश्य "आकाशाभाववत्सर्व"रूपबाधेऽव्याप्तिवारणं क्रियते तदा "ह्रदः जात्यभाववान्" एतत्स्थलीयः यो हि "जातिमान्-जातिमान्" इत्याकारकबाधनिश्चयः तस्य संग्रहो न स्यात्। जातित्वेन ह्रदत्वादिरूपधर्मितावच्छेदकविषयकस्य "जातिमान्-जातिमान्" इत्याकारकज्ञानस्य जातित्वावच्छिन्नप्रकारतानिरूपितह्रदत्वादिनिष्ठधर्मितावच्छेदकतारूपा या विषयता तादृशविषयतायाः लक्षणघटकविषयताभिन्नत्वविरहेण धर्त्तुं शक्यतया तादृशज्ञानस्य "जातिमान्-जातिमान्" इत्याकारकस्यानुमित्यप्रतिबन्धकस्य शून्यत्वान्तविशेषणदानेऽपि वारणासम्भवात्।

एतेषां दोषाणां परिहारार्थमव्यापकीभूतविषयिताशून्यत्वं निश्चये निवेश्यते। तथा च लक्षणस्वरूपम्- "यद्रूपावच्छिन्नविषयितात्वमनाहार्याऽप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टतद्रूपावच्छिन्नविषयितासमानाधिकरणाभावीयप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयिताशून्ययद्रूपावच्छिन्नविषयकनिश्चयत्वव्यापिका प्रकृतानुमितिप्रतिबन्धकता तद्रूपवत्त्वम्" इत्येवं लक्षणं करणीयम्। एवं लक्षणे कृते च नहि कोऽपि दोषः।

ह्रदो वह्निमान् धूमादित्यत्र वह्न्यभावविशिष्टह्रदत्वावच्छिन्नविषयतात्वं वह्न्यभावविशिष्टह्रदत्वावच्छिन्नविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं न भवति। यतो हि "वह्न्यभाववान्ह्रद" इत्याकारकनिश्चये वह्न्यभावविशिष्टह्रदत्वावच्छिन्नविषयिताया एव विद्यमानत्वात्। अपितु तादृशविशिष्टविषयकत्वसमानाधिकरणाभावः जातित्वावच्छिन्नविषयितानास्तीत्याकारकः अभावः, तत्प्रतियोगितावच्छेदकं जातित्वावच्छिन्नविषयित्वं, तच्छून्यज्ञानं "वह्न्यभाववान्ह्रद" इत्याकारकनिश्चयः, तादृशनिश्चयत्वव्यापिकाप्रकृतानुमितिप्रतिबन्धकता जाता, तद्रूपवत्त्वस्य वह्न्यभावविशिष्टह्रदे सत्त्वात् भवति लक्षणसमन्वयः।

इत्थं दोषाघटकजातित्वाद्यवच्छिन्नविषयितायाः दोषविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकतया न हि कुत्रापि दोषः।

अत्रेदं चिन्त्यम्, पर्वतो धूमवान्वह्नेरित्यादिव्यभिचारिस्थलेषु “धूमाभाववद्वृत्तिर्वह्निः” इति विशिष्टविषयकज्ञानमेव प्रतिबन्धकम्। धूमे अभावे अधिकरणतायां च अनुमितिप्रतिबन्धकीभूतयथार्थज्ञानविषयत्वसत्त्वेऽपि प्रतिबन्धकत्वं न वर्त्तते। किन्तु धूमप्रभृतिषु अनुमितिप्रतिबन्धकयथार्थज्ञानविषयता प्रत्येकव्यक्तावस्तीति हेत्वाभासत्वं व्यक्तावागतमतोऽतिव्याप्तिः। एतादृशदोषनिवृत्यर्थं यथार्थज्ञानीययद्रूपावच्छिन्नविषयता प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्तिः तद्रूपावच्छिन्नत्वमिति लक्षणं स्वीकार्यम्। तथा च पर्वतो धूमवान् वह्नेरित्यत्र धूमाभाववद्वृत्तिवह्नित्वावच्छिन्नविषयता पर्वतो धूमवानित्याकारकानुमितिप्रतिबन्धकतानतिरिक्तवृत्तिः वर्त्तते, तद्रूपवत्त्वं धूमाभाववद्वृत्तिर्वह्नौ विद्यते न तु धूममात्रे अभावमात्रे वा। अतो धूमादौ नातिव्याप्तिः। एवं सद्धेतावनुमितिविरोधिभूतं यद् भ्रमात्मकं ज्ञानं तद्विषयीभूतसाध्याभाववत्पक्षादौ नातिप्रसङ्गः।। एवं प्रकारेण यथार्थपदाघटितयद्रूपावच्छिन्नत्वघटितं लक्षणद्वारैवातिव्याप्तेर्वारणं भवितुमर्हति, अतः लक्षणे यथार्थपदस्यावश्यकतैव नास्ति। एतादृशयथार्थपदानिवेशरूपं लाघवं दृष्ट्वा मणिकृद्भिरुपाध्यायैः द्वितीयलक्षणमादृतम्- “यद्विषयकत्वेन लिङ्गज्ञानस्याऽनुमितिविरोधित्वं तत्त्वम्”[८] इति। वस्तुतः लक्षणेऽस्मिन् लिङ्गपदस्यावश्यकता नास्ति। यतोहि बाधनिश्चये विषयरूपेण लिङ्गस्याभावेन तद्विनैव लक्षणं भवितुमर्हति। तथा चोक्तं दीधितिकारेण- लिङ्गमविवक्षितमिति।[९] अस्यायमाशयः- द्वितीयलक्षणे लिङ्गांशनिवेशस्यानतिप्रयोजनकतया लक्षणे तन्निवेशो व्यर्थः। इत्येवं भट्टाचार्योक्तं लिङ्गांशनिवेशस्यानतिप्रयोजनकत्वं नहि साधु सङ्गच्छते। यतोहि तस्य लाघवसम्पादकतया स्वप्रयोजनकत्वमेव। तथाहि लिङ्गात् ज्ञानमितिपञ्चमीसमासेन ज्ञाने लिङ्गज्ञानजन्यत्वं लभ्यते। लिङ्गज्ञानजन्या चानुमितिरेव भवति। एवञ्च लिङ्गपदनिवेशेन यद्रूपावच्छिन्नविषयकानुमितित्वव्यापकं प्रकृतानुमितिप्रतिबन्धकत्वं तद्रूपवत्त्वं हेत्वाभासत्वमिति लभ्यते। इत्थं लक्षणे निवेशिते चैवंविधे लक्षणे आहार्यसंशयभेदनिवेशस्य नहि किञ्चित्प्रयोजनमतः लिङ्गांशनिवेशादाहार्यसंशयभेदात् निवेश-प्रयुक्तं लाघवं जातम्। एवञ्च लिङ्गांशनिवेशस्य स्वप्रयोजनकतया न वैयर्थ्यम्।

यद्युच्यते घटो वृत्तिरित्येतत् स्थलीयबाधे लक्षणस्याऽव्याप्तिः। यतोहि निर्धर्मितावच्छेदकीभूताया अनुमितेरनभ्युपगमादेतत् स्थले तादृशदोषविषयकानुमितिरेवाऽप्रसिद्धिः। अतः लक्षणे ज्ञानस्यैव प्रवेशः कर्त्तव्यः नानुमितेः। तथा चानुमितिस्वरूपलाभार्थं निविष्टस्य लिङ्गपदस्य निरर्थकत्वमस्त्येव। तत्रेत्थं विचिन्तनीयं यदुक्तस्थलेऽपि घटवद्भूतलमित्याकारकानुमितिं कल्पयित्वा तत्र लक्षणं सङ्गमनीयम्। अतः लिङ्गपदनिवेशेन जायमानस्यानुमितिप्रतिबन्धकताघटितलक्षणस्य न घटावच्छिन्नबाधेऽव्याप्तिः।

यदि चैवमुच्येत यदग्रेऽव्यापकीभूतविषयताशून्यत्वस्य निवेशनीयतया घटावच्छिन्नविषयित्वाव्यापकभूतलादिविषयिताशालिघटवद्भूतलमित्याकारकानुमितिमादाय नहि लक्षणसमन्वयः कर्त्तुं शक्यते। एतादृशानुमितिविषयितायाः घटत्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्यत्वात्। यदि च तत्रापि घटांशे घटत्वस्य सामानाधिकरण्यसम्बन्धेन भानात् घटत्वविषयिताया एव अव्यापकविषयितात्वमतः तत्रानुमितेरप्रसिद्धिरेव स्यादतः लिङ्गांशनिवेशः न समीचीनः।

किञ्च यादृशस्थलीयविशेषे एकविशेषेतरबाधस्य पक्षतावच्छेदकता तत्रत्यदोषानुमितेः पूर्वं नहि तत्र विशेषस्य बाधनिश्चयः। तत्र दोषविषयकानुमितिरेव न सम्भवः। अतोऽनुमितिप्रतिबन्धकताघटितलक्षणस्य तत्राऽव्याप्तिः। अतः लक्षणे ज्ञानपदमेव निवेश्यं, न त्वनुमितित्वेनानुमितेः प्रवेशः। तथा च लाघवार्थमनुमितिलाभाय लिङ्गांशनिवेशः निष्प्रयोजनक एवेति। तथा च यद्विषयकत्वेन ज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वं हेत्वाभासत्वमिति हेत्वाभासस्य द्वितीयं लक्षणम्। अस्य ह्रदो वह्निमान् जलादित्यादिबाधस्थले इत्थं समन्वयः- ह्रदो वह्न्यभाववान् जलञ्चेतिहेतुज्ञानं वह्न्यभाववद्ध्रदविषयकं विद्यते तेन ह्रदो वह्निमानित्याकारकानुमितेर्विरोधो भवति।

अतः तद्विषयकत्वपदेन वह्न्यभाववद्ध्रदविषयकत्वस्य ग्रहणं भवति, तद्धर्मवत्त्वस्य वह्न्यभाववद्ध्रदस्वरूपे बाधे सत्त्वात् भवति लक्षणसमन्वयः।

यद्विषयकत्वेन इत्यत्र तृतीयार्थः अवच्छेदकत्वं, तद्यदि अनतिरिक्तवृत्तित्वरूपं तदा लक्षणस्वरूपः- यद्विषयकत्वं प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ती तत्त्वम्। एवं स्थिते यत्पदग्राह्यवह्न्यभावविशिष्टह्रदविषयकत्वस्य ("विशिष्टं शुद्धान्नातिरिच्यते" इति न्यायेन) ह्रदः इत्याकारकज्ञानेऽपि विद्यमानतया तत्र च ह्रदो वह्निमान् इत्याकारकानुमितिप्रतिबन्धकताया अभावात् सर्वत्राऽसम्भवः प्रसज्येत।

यदि तृतीयार्थः अवच्छेदकत्वं स्वरूपसम्बन्धरूपं निवेश्यते, तदा लक्षणस्वरूपं चेत्थं भवति- यद्विषयिता प्रकृतानुमितिप्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकतावती तत्त्वमिति। एवं कृते पूर्वोक्तस्थले (उपरोक्तरीत्या) नासम्भवः। परन्तु वह्न्यभाववान् ह्रदः इत्याकारकज्ञानीया वह्न्यभावविशिष्टह्रदविषयिता यथा ह्रदो वह्निमानित्याकारकानुमितिप्रतिबन्धकतावच्छेदिका तथैव तद्घटकीभूतवह्न्यभावादिविषयतापि तादृशानुमितिप्रतिबन्धकतावच्छेदिका भवति। एवञ्च यत्पदेन वह्न्यभावादेरपि धर्त्तुं शक्यतया तत्त्वस्य वह्न्यभावादौ सत्त्वेन दोषैकदेशेऽतिव्याप्तिः। एतद्दोषपरिहारार्थं यदि प्रतिबन्धकतावच्छेदकतापर्याप्त्यधिकरणत्वं निवेश्यते तदा असम्भवः। यतोहि बाधादिज्ञानस्य भ्रमप्रमासाधारणस्य प्रतिबन्धकतया वह्न्यभावविशिष्टह्रदादिविषयितायाः न प्रतिबन्धकतावच्छेदकत्वम्, अपितु भ्रमप्रमासाधारणनिरूप्यनिरूपकभावापन्नवह्नित्वावच्छिन्नविषयितानिरूपित-अभावत्वावच्छिन्नविषयितानिरूपितह्रदत्वावच्छिन्नविषयिताया एव प्रतिबन्धकतावच्छेदकत्वम्। इत्थञ्च वह्न्यभावविशिष्टह्रदत्वावच्छिन्नविषयितायां प्रतिबन्धकतावच्छेदकतापर्याप्त्यधिकरणत्वविरहादसम्भवः। अतोऽनतिरिक्तवृत्तित्वरूपमेव तृतीयार्थावच्छेदकत्वं वाच्यम्। तदुक्तं दीधितिकारैः- तच्चावच्छेदकत्वञ्चेहानतिरिक्तवृत्तित्वमिति।[१०] तच्च स्वव्यापकतत्कत्वमिति गादाधर्याम्।[११] अर्थात्- अनुमितिप्रतिबन्धकता स्वस्याः व्यापिका सा विषयिता यस्याः सा स्वव्यापकतत्का, तस्याः भावः स्वव्यापकतत्कत्वम्। लक्षणस्थयद्विषयकत्वेन इत्यस्य यद्रूपावच्छिन्नविषयकत्वेन इत्यर्थः। लक्षणघटकज्ञानपदेन "अनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयः" विवक्षणीयः। वह्न्यभाववान् ह्रदः वह्निमानित्याकारकाऽऽहार्यज्ञानमादायाऽसम्भववारणाय "अनाहार्य"पदम्। "ह्रदो वह्न्यभाववानिदं ज्ञानमप्रमा" इत्याकारकज्ञानमादायाऽसम्भववारणाय "अप्रामाण्यज्ञानानास्कन्दितत्व"प्रवेशः। ह्रदो वह्निमान्नवेत्याकारकसंशयमादायाऽसम्भववारणाय संशयान्यत्वार्थकं "निश्चय"पदम्। तथा च लक्षणस्वरूपम्- "अनाहार्याऽप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयकत्वव्यापिकाप्रकृतानुमितिप्रतिबन्धकता तद्रूपवत्त्वमिति। इत्थं दोषैकदेशेऽतिव्याप्तिवारणाय द्वितीयलक्षणघटकतृतीयार्थावच्छेदकत्वं स्वरूपसम्बन्धरूपं परित्यज्य अनतिरिक्तवृत्तित्वरूपं" निवेशनीयम्। तत्रेयं जिज्ञासा जायते यत् स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशनेनापि यद्रूपावच्छिन्नविषयितापदेन यद्रूपावच्छिन्नविषयितासामान्यं निवेश्य स्वरूपसम्बन्धरूपावच्छेदक-त्वघटितमेवलक्षणं निर्वाच्यम् तेनैव दोषैकदेशेऽतिव्याप्तिवारणं सम्भवति। तथाहि- स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशे सति यद्रूपावच्छिन्नविषयितात्वव्यापिका प्रकृतानुमितिप्रतिबन्धकतावच्छेदकता तद्रूपवत्त्वमित्येवं लक्षणं कर्त्तव्यम्। ह्रदो वह्निमान् धूमादि-त्यादौ वह्न्यभावविशिष्टह्रदादिरूपदोषैकदेशीयवह्न्यभावादिविषयतासामान्यस्य प्रतिबन्धकतावच्छेदकत्वविरहात्।

यद्यपि ह्रदो वह्निमानित्याकारकानुमितिं प्रति दोषविषयतायाः प्रतिबन्धकतावच्छेदकत्वे तद्धटकीभूतविषयितायाः अपि प्रतिबन्धकतावच्छेदकत्वेन दोषैकदेशेऽतिव्याप्तिः स्यात् परन्तु विषयितासामान्यनिवेशे सति वह्न्यभावत्वावच्छिन्नविषयितासामान्यस्य नहि प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वम्। वह्न्यभावत्वावच्छिन्नविषयितात्वस्य केवलं “वह्न्यभावः” इत्याकारकनिश्चयेऽपि विद्यमानतया तत्र च प्रकृतानुमितिप्रतिबन्धकत्वाभावान्नहि वह्न्यभावत्वावच्छिन्नविषयितासामान्यमनुमितिप्रतिबन्धकतावच्छेदकम्। अतो न यद्रूपपदेनैकदेशवृत्तिधर्मस्य संग्रहः, न वा एकदेशीयविषयतायाः संग्रहः कर्त्तुं शक्यते। अतः दोषैकदेशवृत्तिधर्मावच्छिन्नविषयितात्वव्यापिका नहि प्रकृतानुमितिप्रतिबन्धकतावच्छेदकता अतो नातिव्याप्तिः। इत्थं स्वरूपसम्बन्धरूपावच्छेदकत्वं परित्यज्य अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वाभिधानं न युक्तिसहम्।

न च यद्रूपावच्छिन्नविषयकत्वव्यापिकाप्रकृतानुमितिप्रतिबन्धकता इत्येवमर्थः अनतिरिक्तवृत्तित्वकल्पे लभ्यते। स्वरूपसम्बन्धरूपावच्छेदकत्वकल्पे च यद्रूपावच्छिन्नविषयितात्वव्यापकत्वमनुमितिप्रतिबन्धकतावच्छेदकत्वे निवेशनीयम्। इत्थम् अतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशने एव गौरवमिति वाच्यम्। अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशकल्पे अनाहार्याऽप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टस्य प्रवेशनीयतया गौरवम्। स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशे च तस्य अनिवेशनीयतया स्वरूपस-म्बन्धरूपावच्छेदकत्वनिवेशे एव लाघवम्। किन्तु मतमिदं न समीचीनम्। स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशपक्षे “पाषाणमयत्व-वत्पर्वते” अतिव्याप्तिः। अनतिरिक्तवृत्तित्वकल्पे च नातिव्याप्तिः।

यद्येवं ब्रूयात् यत् अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य प्रवेशेऽपि वह्न्यभाववज्जलवद्वृत्तिजलवद्ह्रदेऽतिव्याप्तिः, तद्वारणाय अनतिरिक्तवृत्तित्ववादिना ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्यावश्यं निवेशनीयतया स्वरूपसम्बन्धरूपावच्छेदकत्ववादिमतेऽपि ज्ञानवैशिष्ट्यानवच्छिन्नत्वं निवेश्य पाषाणमयत्वविशिष्टपर्वते अतिव्याप्तिः वारयितुं शक्यते, इत्यपि वक्तुं न शक्यते। जलव्यापकवह्न्यभावसमानाधिकरणजलवद्ध्रदरूपसत्प्रतिपक्षेऽव्याप्तिः स्यात् यदि ज्ञानवैशिष्ट्यानवच्छिन्नत्वं निवेश्येत।

अतः मन्मते नहि प्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वप्रवेशः। अपि तु वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदेऽतिव्याप्तिवारणाय विशिष्टद्वयाघटितत्वमेव निवेश्यम्। एवञ्च विशिष्टद्वयाघटितत्वघटितहेत्वाभासलक्षणञ्चेत्थं कर्त्तव्यं- “यद्रूपावच्छिन्नविषयिताविशिष्टयद्रूपावच्छिन्नविषयिताशालिनिश्चयत्वव्यापिकाप्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता, तद्रूपावच्छिन्नविषयिताविशिष्टतद्रूपावच्छिन्नविषयिताशून्यप्रतीतिविषयतावच्छेदकयद्रूपावच्छिन्नविषयकनिश्चयत्वव्यापिकाप्रकृतानुमितिप्रतिबन्धकता तद्रूपवत्त्वमि”ति।[१२] तथा च अलक्ष्ये नातिप्रसङ्गः। तद्यथा वह्न्यभाववज्जलवत्त्वावच्छिन्नविषयिताविशिष्टजलवद्ध्रदत्वावच्छिन्नविषयिताशालिनिश्चयत्वव्यापिका-ह्रदोवह्निमानित्याकारकप्रकृतानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकता भवति, तद्रूपावच्छिन्न अर्थात् वह्न्यभाववज्जलवत्त्वावच्छिन्नविषयिताविशिष्ट, जलवद्ध्रदत्वावच्छिन्नविषयिताशून्यप्रतीतिः नहि वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदत्वावच्छिन्नविषयिणी प्रतीतिः। अतः यद्रूपपदेन वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदत्वस्य धर्त्तुमशक्यतया न पूर्वोक्तातिव्याप्तिप्रसङ्गः। वह्न्यभावविशिष्टह्रदरूपे बाधे चेत्थं समन्वयः कर्त्तुं शक्यते। यतः वह्न्यभाववज्जलवत्त्वावच्छिन्नविषयिताविशिष्टजलवद्ध्रदत्वावच्छिन्नविषयिताशालिनिश्चयत्वव्यापिका प्रकृतह्रदो वह्निमानित्याकारकानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकता भवति। तद्रूपावच्छिन्न अर्थात् वह्न्यभाववज्जलवत्त्वावच्छिन्नविषयिताविशिष्टजलवद्ध्रदत्वावच्छिन्न-

विषयिताशून्यप्रतीतिः ह्रदो वह्न्यभाववानित्याकारिका प्रतीतिः तादृशप्रतीतिविषयतावच्छेदकं वह्न्यभावविशिष्टह्रदत्वं तादृशह्रदत्वावच्छिन्नविषयकनिश्चयत्वव्यापिका प्रकृतानुमितिप्रतिबन्धकता जाता तद्रूपवत्त्वस्य वह्न्यभावविशिष्टे ह्रदे सत्त्वाल्लक्षणसमन्वयः।

तथापि ह्रदो वह्निमान् धूमादित्यत्र जलव्यापकवह्न्यभावसमानाधिकरणजलवद्ध्रदरूपे सत्प्रतिपक्षे हेत्वाभासलक्षणस्याऽव्याप्तिः। तादृशसत्प्रतिपक्षस्य विषयताविशिष्टज्ञानत्वेनैव प्रतिबन्धकताऽभ्युपेयते। एका जलव्यापकवह्न्यभावत्वावच्छिन्नविषयिता अपरा च वह्न्यभावसमानाधिकरणजलवद्ध्रदत्वाच्छिन्नविषयिता एवञ्च जलव्यापकवह्न्यभावत्वावच्छिन्नविषयिताविशिष्टवह्न्यभावसमानाधिकरणजलवद्ध्रदत्वावच्छिन्नविषयिताशालिनिश्चयत्वव्यापिका प्रकृतानुमितिप्रतिबन्धकता, तद्रूपावच्छिन्न अर्थात् जलव्यापकवह्न्यभावत्वावच्छिन्नविषयिताविशिष्टवह्न्यभावसमानाधिकरणजलवद्ध्रदत्वावच्छिन्नविषयिताशून्यत्वस्य जलव्यापकवह्न्यभावसमानाधिकरणजलवद्ध्रदे विरहादव्याप्तिः। एतद्दोषपरिहारार्थं लक्षणघटकविशिष्टद्वयविषयितायां सत्प्रतिपक्षघटकदलद्वयविषयिताभिन्नत्वस्य निवेशान्नोक्ताऽव्याप्तिः। तथा सति लक्षणघटकविशिष्टद्वयविषयितायाः सत्प्रतिपक्षघटकदलद्वयविषयिताया अभिन्नत्वात् यद्रूपपदेन जलव्यापकवह्न्यभावसमानाधिकरणजलवद्ध्रदत्वस्य धर्त्तुमशक्यत्वादिति।

ननु सत्प्रतिपक्षघटकविषयिताभिन्नत्वस्य विशिष्टद्वयविषयितायां विवक्षणे पर्वतो धूमवान् वह्नेरित्यत्र धूमाभाववद्वृत्तित्वविशिष्टवह्निरूपव्यभिचारेऽव्याप्तिः। धूमाभाववदयोगोलकत्वावच्छिन्नविषयिताविशिष्टायोगोलकवृत्तिवह्नित्वावच्छिन्नविषयितायास्तादृशविशिष्टद्वयविषयितापदेनोपादानसम्भवेऽपि तत्र सत्प्रतिपक्षघटकविषयिताभिन्नत्वसम्पादनं दुःशक्यं, तादृशपक्षसाध्यकस्थले सत्प्रतिपक्षस्यैवाऽप्रसिद्धत्वादत आह[१३]- "यत्र तादृशसत्प्रतिपक्षाऽप्रसिद्धिः तत्र भिन्नान्तमनुपादेयमेव, साध्यादिभेदेन लक्षणभेदात्" इति।[१४]

यद्यपि स्वरूपसम्बन्धरूपप्रतिबन्धकतावच्छेदकत्वविवक्षणे पर्वतो धूमवान् वह्नेरित्यत्र प्रमेयत्वविशिष्टो यो धूमाभाववद्वृत्तित्वविशिष्टो वह्निः तत्र प्रमेयत्वविशिष्टव्यभिचारे नातिव्याप्तिः, तथापि अनतिरिक्तवृत्तित्वरूपावच्छेदकताविवक्षाया एव पूर्वोक्तयुक्त्या आवश्यकतया अनतिरिक्तवृत्तित्वरूपावच्छेदकताघटितपर्यवसितलक्षणस्य तत्रातिव्याप्तिः। अत आह दीधितिकारः- "विशेषणीयञ्च तादृशविशिष्टान्तराऽघटितत्वेन" इति।[१५] एवञ्च लक्षणस्थयद्रूपावच्छिन्नविषयकनिश्चये विशिष्टान्तराऽघटितत्वं निवेश्यते तदा लक्षणस्वरूपं- "विशिष्टान्तराघटित-अनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयकनिश्चयत्वव्यापिका प्रकृतानुमितिप्रतिबन्धकता तद्रूपवत्त्वमि"ति। तथा च प्रमेयत्वविशिष्टधूमाभाववद्वृत्तित्वविशिष्टवह्निरूपप्रमेयत्वविशिष्टव्यभिचारस्य विशिष्टान्तरेण व्यभिचारेण घटिततया, विशिष्टाऽन्तराघटितयद्रूपावच्छिन्नविषयकनिश्चयपदेन न प्रमेयत्वविशिष्टव्यभिचारः धर्त्तुं शक्यते, किन्तु व्यभिचारत्वावच्छिन्नविषयकनिश्चयमेव। तद्रूपवत्त्वस्य च शुद्धव्यभिचारे एव सत्त्वान्नप्रमेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिः।

तथापि दोषः। अन्तरपदस्य भिन्नार्थकतया अत्र प्रमेयत्वविशिष्टभिन्नो न व्यभिचारःअपि तु घटादिकम्, तदघटितत्वस्य प्रमेयत्वविशिष्टव्यभिचारे सत्त्वात्। यद्रूपपदेन प्रमेयत्वविशिष्टव्यभिचारत्वस्य धर्त्तुं शक्यतया प्रमेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिः दुष्परिहरैव।

अत्रेदं बोध्यम्- एतल्लक्षणघटकीभूतविशिष्टान्तरं न हि विशिष्टभिन्नार्थकम् अपितु "स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकावच्छिन्नपरम्"। एवञ्च लक्षणस्वरूपम्- "स्वावच्छिन्ना[1]विषयकप्रतीतिविषयतावच्छेदकं[2], अथ च प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकं यद्रूपं, तद[3]वच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं[4] यत्स्वं तादृशस्वात्मकयद्रूपावच्छिन्नविषयकनिश्चयत्वव्यापिका प्रकृतानुमितिप्रतिबन्धकता तद्रूपवत्त्वमि"ति।

वह्न्यभावविशिष्टह्रदरूपे बाधे चेत्थं समन्वयः- स्वपदेन दोषतावच्छेदकं वह्न्यभावविशिष्टह्रदत्वरूपं बाधत्वं गृह्यते। तथा च वह्न्यभावविशिष्टह्रदत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकम् अथ च ह्रदो वह्निमान् वह्निव्याप्यधूमवांश्चेत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकं व्यभिचारत्वं, तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकवह्न्यभावविशिष्टह्रदत्वात्मकस्ववत्त्वस्य वह्न्यभावविशिष्टह्रदे सत्त्वाद् भवति लक्षणसमन्वयः। प्रमेयत्वविशिष्टव्यभिचारे च नातिप्रसङ्गः। तथा हि – स्वं प्रमेयत्वविशिष्टव्यभिचारत्वं, प्रमेयत्वविशिष्टव्यभिचारत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकम्, अथ च पर्वतो धूमवान् धूमव्याप्यवह्निमांश्चेत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकं यद्रूपं- शुद्धव्यभिचारत्वं, तदवच्छिन्नविषयकप्रतीतिविषयतावच्छेदकं स्वं नहि प्रमेयत्वविशिष्टव्यभिचारत्वमिति नातिव्याप्तिः।

यदि विशिष्टान्तराघटितत्वं निवेश्य प्रमेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिर्वार्यते तदा "धूमव्यभिचारिवह्निमान् धूमवान् वह्नेः" इत्यत्र "धूमाभाववद्धूमव्यभिचारिवह्निमद्रू"पबाधेऽव्याप्तिः।[१६] तथाहि स्वं- धूमाभाववद्धूमव्यभिचारिवह्निमत्त्वं तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकम्, अथ च धूमव्यभिचारिवह्निमान् धूमव्याप्यवह्निमांश्चेत्याकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकं धूमाभाववत्वृत्तित्वविशिष्टवह्नित्वरूपं व्यभिचारत्वं, तदवच्छिन्नाविषयकप्रतीति-

---

1 अत्र लक्षणे स्वावच्छिन्नत्वं परित्यज्य स्वाश्रयत्वविवक्षणे अर्थात् स्वाश्रयाविषयकप्रतीतिविषयतावच्छेदकमित्यादिलक्षणस्वीकारे प्रमेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिः। तथाहि स्वं प्रमेयत्वविशिष्टव्यभिचारत्वं तदाश्रयपदेन प्रमेयत्वविशिष्टव्यभिचाराभिन्नतया व्यभिचारस्यापि धर्त्तुं शक्यतया तदविषयकप्रतीतिविषयतावच्छेदकं न हि व्यभिचारत्वमपि तु बाधादिकम्, तच्च प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयतानिरूपकतावच्छेदकम्, एवञ्च यद्रूपपदग्राह्यबाधत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य प्रमेयत्वविशिष्टव्यभिचारत्वे सत्त्वात् तस्यापि स्वपदग्राह्यतया प्रमेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिर्दुर्वारा। अतः स्वाश्रयत्वमुपेक्ष्य स्वावच्छिन्नाविषयकत्वप्रवेशः।

2 लक्षणस्थ स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वमनिवेश्य यदि स्वावच्छिन्नाविषयकप्रतीतिविषयवृत्तित्वं यद्रूपे निवेश्यते तदा सर्वत्र व्यभिचारादावसम्भवः। तथाहि स्वं व्यभिचारत्वम्, व्यभिचारत्वावच्छिन्नाविषयिणीप्रतीतिः प्रमेयमित्याकारिकाप्रतीतिः, तद्विषयः व्यभिचारोऽपि, तद्वृत्ति एव व्यभिचारत्वम्। एवञ्च यद्रूपपदेन व्यभिचारत्वस्य धर्त्तुं शक्यतया, व्यभिचारत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य स्वस्मिन् व्यभिचारत्वे विरहात् सर्वत्र व्यभिचारादावसम्भवः। अतः यद्रूपे स्वावच्छिन्नाविषयकप्रतीतिविषयवृत्तित्वमनिवेश्य स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वनिवेशः कर्त्तव्यः।

3 लक्षणस्थं तदवच्छिन्नाविषयकत्वमुपेक्ष्य तदाश्रयाविषयकत्वनिवेशने प्रमेयं गगनवद्वाच्यत्वादित्यत्र गगनाभाववद्वृत्तिवाच्यत्वरूपे व्यभिचारेऽव्याप्तिः। तथाहि स्वं गगनाभाववद्वृत्तिवाच्यत्वत्वम्, तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकमथ च प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयतानिरूपकतावच्छेदकं यद्गगनाभाववन्मेयत्वरूपं बाधत्वं तदाश्रयः तादृशव्यभिचारः(प्रमेयः) तदविषयकप्रतीतिविषयतावच्छेदकं न हि गगनाभाववद्वृत्तित्वविशिष्टवाच्यत्वत्वरूपं व्यभिचारत्वम्, वस्तुमात्रविषयकप्रतीतेरेव प्रमेयविषयकत्वात्। तथा च प्रमेयाविषयकप्रतीतेरप्रसिद्ध्याऽव्याप्तिः। अतः तदाश्रयाविषयकत्वमुपेक्ष्य तदवच्छिन्नाविषयकत्वप्रवेशः कर्त्तव्यः।

4 यदि लक्षणस्थ स्वस्मिन् तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वमुपेक्ष्य तदवच्छिन्नाविषयकप्रतीतिविषयवृत्तित्वं विशेषणं दीयते तदा पुनः प्रमेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिः स्यात्। यतो हि प्रमेयत्वविशिष्टव्यभिचारत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकमथ च प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयतानिरूपकतावच्छेदकं यद्रूपं- व्यभिचारत्वं, तदवच्छिन्नाविषयिणीप्रतीतिः प्रमेयमित्याकारिका। तादृशप्रतीतिविषयः प्रमेयत्वविशिष्टव्यभिचारोऽपि, तत्र प्रमेयत्वविशिष्टव्यभिचारत्वं विद्यते। एवञ्च स्वपदेन प्रमेयत्वविशिष्टव्यभिचारत्वस्यापि धर्त्तुं शक्यतया तादृशस्वात्मकयद्रूपावच्छिन्नविषयकनिश्चयत्वव्यापकत्वस्य प्रकृतानुमितिप्रतिबन्धकतायां विद्यमानतया तद्रूपवत्त्वस्य प्रमेयत्वविशिष्टव्यभिचारे सत्त्वादिति। अतः स्वस्मिन् तदवच्छिन्नाविषयकप्रतीतिविषयवृत्तित्वमपहाय तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वमुपादेयमिति।

विषयतावच्छेदकं न हि धूमाभाववद्धूमव्यभिचारिवह्नित्वरूपं बाधत्वं भवितुमर्हति। तस्य व्यभिचारत्वावच्छिन्नविषयकप्रतीतिविषयतावच्छेदकत्वात्। अतः स्वपदेन ‘‘धूमाभाववद्धूमव्यभिचारिवह्निमत्त्व’’स्य धर्त्तुमशक्यत्वादिति।

एतद्दोषपरिहारायाचार्य्यैः लक्षणमित्थं परिष्कृतं-‘‘स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकम् अथ च स्वावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतात्वव्यापकविषयितानिरूपकतावच्छेदकं यद्रूपं तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत्स्वं तादृशस्वात्मकयद्रूपावच्छिन्नविषयकनिश्चयत्वव्यापिका प्रकृतानुमितिप्रतिबन्धकता तद्रूपवत्त्वमि’’ति। तथा च धूमव्यभिचारिवह्निमत्त्वरूपबाधत्वावच्छिन्नविषयकप्रतीतिविषयतावच्छेदकम् अथ च स्वावच्छिन्नधूमाभाववद्धूमव्यभिचारिवह्नित्वावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितिप्रतिबन्धकतात्वव्यापकविषयितानिरूपकताऽवच्छेदकरूपं नहि व्यभिचारत्वम्, अपि तु धूमव्यभिचारिवह्निमद्वृत्तिधूमाभावत्वरूपं विपरीतबाधत्वं, तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकस्ववत्त्वस्य ‘‘धूमाभाववद्धूमव्यभिचारिवह्निमद्रू’’पे बाधे वर्त्तमानत्वान्नाव्याप्तिः।

एवं परिष्कृतेऽपि (व्यभिचारघटितबाधेऽव्याप्तिवारणेऽपि) बाधविशिष्टव्यभिचारेऽतिव्याप्तिर्दुर्वारा स्यात्।[१७] तथाहि बाधविशिष्टव्यभिचारत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकम् अथ च बाधविशिष्टव्यभिचारत्वावच्छिन्नविषयकत्वव्यापकानुमितिप्रतिबन्धकतात्वव्यापकविषयितानिरूपकतावच्छेदकं व्यभिचारविशिष्टबाधत्वं, तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकबाधविशिष्टव्यभिचारत्वरूपस्ववत्वस्य ‘‘बाधविशिष्टव्यभिचारे’’ सत्त्वादतिव्याप्तिः बाधविशिष्टव्यभिचारस्य हेत्वाभासत्वाभावात्। एतद्दोषपरिहाराय विशिष्टान्तरतावच्छेदकयद्रूपे यथा स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वम् अथ च स्वावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितिप्रतिबन्धकतात्वव्यापकविषयितानिरूपकतावच्छेदकत्वं विशेषणं तथैव स्वावच्छिन्नविषयित्वाव्यापकविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेदकत्वमपि विशेषणं देयम्। एवञ्च लक्षणस्वरूपम्- ‘‘स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकम् अथ च स्वावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतात्वव्यापकविषयितानिरूपकतावच्छेदकम् अथ च स्वावच्छिन्नविषयित्वाव्यापकीभूतविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेदकं यद्यद्रूपं तत्तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत्स्वं तादृशस्वात्मकयद्रूपावच्छिन्नविषयकनिश्चयत्वव्यापिका प्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपवत्त्वं हेत्वाभासत्वम्’’। एवञ्च बाधविशिष्टव्यभिचारत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य अथ च बाधविशिष्टव्यभिचारत्वावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितिप्रतिबन्धकत्वाव्यापकविषयितानिरूपकतावच्छेदकत्वस्य व्यभिचारविशिष्टबाधत्वे सत्त्वेऽपि बाधविशिष्टव्यभिचारत्वावच्छिन्नविषयित्वव्यापिका या व्यभिचारविशिष्टबाधत्वावच्छिन्नविषयता तच्छून्यज्ञानीयविषयितानिरूपकतावच्छेदकत्वस्य व्यभिचारविशिष्टबाधत्वे विरहात् यद्रूपपदेन कस्यापि व्यभिचारविशिष्टबाधत्वादेः धर्त्तुमशक्यत्वात् बाधविशिष्टव्यभिचारे नातिव्याप्तिरिति।

यद्यप्येवं लक्षणे कृते बाधविशिष्टव्यभिचारे नातिव्याप्तिः, तथापि ह्रदो वह्निमान् धूमादित्यादौ सर्वत्र बाधव्यभिचारादावसम्भवः। तथाहि- धूमाभावविशिष्टह्रदत्वरूपबाधत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत् धूमाभावविशिष्टह्रदत्वावच्छिन्नविषयकत्वाव्यापकप्रकृतानुमितिप्रतिबन्धकतात्वव्यापकविषयितानिरूपकतावच्छेदकं ह्रदवृत्तिधूमाभावत्वं, तच्च न धूमाभावविशिष्टह्रदत्वावच्छिन्नविषयित्वव्यापकविषयिताशून्यज्ञानीयविषयितानिरूपकतावच्छेदकं भवति। एवञ्च तादृशविशेषणत्रयविशिष्टयद्रूपस्याऽप्रसिद्धतया विशिष्टान्तरतावच्छेदकधर्माऽप्रसिद्ध्याऽसम्भवः स्यात्।

एतद्दोषवारणार्थं विशिष्टान्तराघटितत्वघटितं हेत्वाभासलक्षणमित्थं परिष्करणीयम्- "स्वावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितिप्रतिबन्धकतात्वव्यापकविषयितानिरूपकतावच्छेदको कश्चिद्धर्मः स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदको यस्य स्वस्य एवं भूतं यद्यद् स्वं तत्तदवच्छिन्नविषयकत्वाभावकूटवत्प्रतीतिविषयतावच्छेदकयद्रूपावच्छिन्नविषयकनिश्चयत्वव्यापिकाप्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकता तद्रूपवत्त्वमि"ति।[१८] एवञ्च न पूर्वोक्तासम्भवादिदोषः। ह्रदो वह्निमान् धूमादित्यादौ वह्न्यभाववद्ध्रदरूपे बाधे चेत्थं समन्वयः- प्रमेयत्वविशिष्टवह्न्यभावविशिष्टह्रदत्वावच्छिन्नविषयकत्वव्यापकह्रदधर्मिकवह्न्यनुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतात्वव्यापिका या शुद्धवह्न्यभावविशिष्टह्रदत्वावच्छिन्नविषयिता तन्निरूपितावच्छेदकः कश्चिद्धर्मः वह्न्यभावविशिष्टह्रदत्वम्, तच्च प्रमेयत्वविशिष्टवह्न्यभावविशिष्टह्रदत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदको भवति। एवं भूतं यद्यद्स्वं प्रमेयत्वविशिष्टबाधत्वं, तादृशप्रमेयत्वविशिष्टबाधत्वावच्छिन्नविषयकत्वाभावकूटवद्प्रतीतिविषयतावच्छेदकवह्न्यभावविशिष्टह्रदत्वरूपं बाधत्वं यद्रूपपदेन गृह्यते, तादृशवह्न्यभावविशिष्टह्रदत्वरूपं यद्रूपावच्छिन्नविषयकनिश्चयत्वं, तादृशनिश्चयत्वव्यापिका प्रकृतानुमितिप्रतिबन्धकता जाता, तद्रूपवत्त्वस्य वह्न्यभावविशिष्टह्रदरूपे बाधे सत्त्वादिति।

इत्थं द्वितीय-"न च कल्पस्य" निर्वचने कृते धूमव्यभिचारिवह्निमान् धूमवान् वह्नेः इत्यत्रैव धूमाभावविशिष्टधूमव्यभिचारिवह्निमद्रूपे बाधे एव अव्याप्तिः दुष्परिहरा स्यात्। धूमव्यभिचारिवह्निमत्त्वरूपस्वाच्छिन्नविषयकत्वव्यापकव्याप्तिग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतात्वव्यापकविषयतानिरूपकतावच्छेदकः, अथ च तादृशबाधत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकः यः धूमाभाववद्वृत्तित्वविशिष्टवह्नित्वरूपो धर्मः यस्य धूमव्यभिचारिवह्निमत्त्वस्य, एवं भूतं यद्यत्स्वं धूमव्यभिचारिवह्निमत्त्वं, तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य धूमाभाववद्धूमव्यभिचारिवह्निमत्त्वरूपे बाधेऽभावादव्याप्तिः। अतः द्वितीय-न च कल्पस्यापि न समीचीनत्वम्, यद्दोषपरिहाराय एतल्लक्षणं कृतं तद्दोषस्यैव तदवस्थत्वात्।

व्यभिचारघटितबाधे अव्याप्तिवारणार्थं यदि तृतीय-न च कल्पस्यानुसरणं क्रियते तदा लक्षणस्वरूपं चेत्थं जायते- "स्वावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितिप्रतिबन्धकतात्वव्यापकयत्किञ्चिद्विषयिता यादृश-यादृशधर्मावच्छिन्ना निरूपिता तादृश-तादृशधर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकस्ववत्त्वम्"।

ह्रदो वह्निमान् धूमादेतत्स्थलीयबाधे लक्षणसमन्वयश्चेत्थं भवति- वह्न्यभावविशिष्टह्रदत्वरूपबाधत्वावच्छिन्नविषयकत्वव्यापकह्रदो वह्निमानित्याकारकानुमितिप्रतिबन्धकतात्वव्यापकीभूतवह्न्यभावविशिष्टह्रदात्मकह्रदविषयितायां वह्न्यभावविशिष्टह्रदत्वावच्छिन्ननिरूपितत्वस्य विद्यमानतया, सा च विषयिता घटत्वाद्यवच्छिन्नानिरूपितैव भवति, तादृशघटत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य वह्न्यभावविशिष्टह्रदत्वे सत्त्वेन तादृशवह्न्यभावविशिष्टह्रदत्वरूपस्ववत्त्वस्य "वह्न्यभावविशिष्टह्रदे" विद्यमानतया भवति लक्षणसमन्वयः।

व्यभिचारघटितबाधस्थलेऽपि धूमाभाववद्धूमव्यभिचारिवह्निमत्त्वरूपस्वावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतात्वव्यापकत्वस्य धूमवद्व्यभिचारिविषयितायामभावात् तादृशप्रतिबन्धकतात्वव्यापकीभूतयत्किञ्चित्विषयितापदेन व्यभिचारघटितबाधविषयितायामेव विद्यमानतया तत्र च घटत्वावच्छिन्नानिरूपितत्वस्य सत्त्वेन तादृशघटत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकव्यभिचारघटितबाधत्वरूपस्ववत्त्वस्य बाधे सत्त्वेन भवति व्यभिचारघटितबाधे लक्षणस-मन्वयः।

तथापि तृतीये न च कल्पे बाधविशिष्टव्यभिचारेऽतिव्याप्तिर्दुर्वारा। यतोहि बाधविशिष्टव्यभिचारत्वरूपस्वावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितिप्रतिबन्धकतात्वव्यापकयत्किञ्चिद्विषयितापदेन बाधविषयिता व्यभिचारविषयिता च धर्त्तुं न शक्यते, तयोः प्रतिबन्धकतासामान्यानवच्छेदकत्वात्। किन्तु बाधविशिष्टव्यभिचारविषयितैव तादृशप्रतिबन्धकतात्वव्यापकविषयितानिरूपकतावच्छेदिका यत्किञ्चिद्विषयिता, तत्र च बाधविशिष्टव्यभिचारत्वावच्छिन्ननिरूपितत्वमेव। एवञ्च सा विषयिता घटत्वावच्छिन्नानिरूपिता, तादृशघटत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकस्ववत्त्वस्य बाधविशिष्टव्यभिचारे सत्त्वादतिव्याप्तिः अशक्यपरिहारा स्यात्।

एवं व्यभिचारघटितबाधेऽव्याप्तिवारणाय यदि चतुर्थः न च कल्पः आश्रयते तदा लक्षणस्वरूपमित्थं जायते- ''यद्धर्मावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितिप्रतिबन्धकतात्वव्यापकविषयितात्वव्यापकं यद्धर्मावच्छिन्ननिरूपितत्वं तद्धर्मवत्त्वम्'' इति। तथा च न व्यभिचारघटितबाधेऽव्याप्तिः। यतोहि ''धूमाभाववद्धूमव्यभिचारिवह्निमान् धूमवान्'' इत्याकारकानुमितित्वव्यापकविषयितानिरूपकतावच्छेदकीभूतव्यभिचारघटितबाधविषयितायां धूमाभाववद्धूमव्यभिचारिवह्निमत्त्वावच्छिन्ननिरूपितत्वस्य विद्यमानतया तादृशधूमाभाववद् धूमव्यभिचारिवह्निमत्त्वरूपबाधत्वस्य यद्धर्मपदेन धर्त्तुं शक्यतया भवति लक्षणसमन्वयः।

तथापि बाधविशिष्टव्यभिचारत्वावच्छिन्नविषयकत्वव्यापकप्रकृतानुमितिप्रतिबन्धकतात्वव्यापकविषयितानिरूपकतावच्छेदकीभूतबाधविशिष्टव्यभिचारविषयितायां बाधविशिष्टव्यभिचारत्वावच्छिन्ननिरूपितत्वस्य विद्यमानतया यद्धर्मपदेन बाधविशिष्टव्यभिचारत्वस्य धर्त्तुं शक्यतया ''बाधविशिष्टव्यभिचारे''ऽतिव्याप्तिर्दुर्वारा स्यात्। इत्थं ''न च कल्प''चतुष्टयेऽपि विशिष्टान्तराघटितत्वघटितलक्षणे जायमानस्य व्यभिचारघटितबाधेऽव्याप्तिदोषस्य कथमपि परिहारः कर्त्तुं न शक्यते।

अत्रेदं विचिन्तनीयं यत् निर्वह्निः पर्वतो वह्निमान् धूमादित्यादौ ''निर्वह्निः पर्वतो वह्निमानि''त्याकारकज्ञानस्याऽऽहार्यतया निर्वह्निः पर्वतो वह्निमानित्याकारिकाया अनुमितेरप्यप्रसिद्धिः। अपरोक्षस्यैवाऽऽहार्य्यज्ञानस्य स्वीकारात् परोक्षानुमित्याद्यात्मकमाहार्य्यज्ञानं न सम्भवति। अत उक्तस्थले अनुमितेरप्रसिद्ध्या तद्दोषपरिहारार्थं कल्पान्तरस्य विवक्षणीयतया एतल्लक्षणे ''धूमव्यभिचारिवह्निमान् धूमवान् वह्नेरि''त्यत्र बाधेऽव्याप्तिप्रदर्शनमसङ्गतम्। एतत्स्थलीयबाधस्यानुमितिप्रतिबन्धकताघटितहेत्वाभासलक्षणस्य लक्ष्यत्वमेव नास्ति, तदा एतल्लक्षणे तत्स्थलीयाव्याप्तिवारणप्रयासो व्यर्थ एव।

तथापि ''विशेषगुणाभाववान् घटः गुणसामान्याभाववान्'' इत्यत्र ''विशेषगुणाभाववान् घटः गुणसामान्याभाववान् गुणसामान्याभावव्याप्यवांश्च'' इत्याकारकसमूहालम्बनानुमितिप्रसिद्धतया ''विशेषगुणवत्घटरूपाश्रयासिद्धावव्याप्तेः'' विशिष्टान्तराघटितत्वलक्षणे वारयितुमशक्यः। अतस्तद्वारणायायासो विधेयः। निर्वह्निपर्वतपक्षकवह्निसाध्यकस्थले वह्निमत्पर्वते प्रतिबन्धकताघटितलक्षणस्य तत्स्थलीयवह्निमत्पर्वतरूपाश्रयासिद्धावव्याप्तिः। यतोहि तत्र निर्वह्निः पर्वतो वह्निमानित्याकारकज्ञानस्याऽऽहार्य्यत्वेनानुमितित्वासम्भवादनुमितिप्रतिबन्धकज्ञानविषयत्वलक्षणस्याव्याप्तिः। एतद्दोषपरिहारार्थम् अनुमितिप्रतिबन्धकत्वाघटितमपि हेत्वाभासस्य लक्षणं कृतमस्ति। तथाहि- ''अनाहार्याऽप्रामाण्यज्ञानानास्कन्दितनिश्चयविशिष्टयद्रूपावच्छिन्नविषयकनिश्चयाऽव्यवहितोत्तरानुमितिसामान्ये विरोधिविषयिताप्रयुक्तः, प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारताकत्व, साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितव्याप्तित्वावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपितहेतुतावच्छेदकाव-

च्छिन्नप्रकारकत्वोभयाभावस्तद्रूपवत्त्वं हेत्वाभासत्वम्"। तथाच निर्वह्निः पर्वतो वह्निमानित्याकारकानुमितेरप्रसिद्धत्वेऽपि अनाहार्याऽप्रामाण्यज्ञानानास्कन्दितयद्रूपावच्छिन्नविषयकनिश्चयपदेन "वह्निमान् पर्वतः" इत्याकारकाश्रयासिद्धिनिश्चयस्य ग्रहणात् तदव्यवहितोत्तरानुमितिसामान्यान्तर्गतपर्वतो वह्निमानित्याकारकानुमितौ निर्वह्निपर्वतविशेष्यकवह्निप्रकारकत्ववह्निव्याप्यधूमप्रकारकत्वोभयाभावस्य सत्त्वेन धूमवत्पर्वतत्वरूपधर्मवत्त्वस्य धूमवान्पर्वतः इत्याकारकाश्रयासिद्धिनिश्चये सत्त्वाद् भवत्यव्याप्तिवारणम्।

एवं ह्रदो वह्निमान् धूमादित्यादिप्रसिद्धस्थले वह्न्यभावविशिष्टह्रदात्मकबाधेऽपि लक्षणसमन्वयः कर्तुं शक्यते। तत्रापि वह्न्यभावविशिष्टह्रदत्वावच्छिन्नविषयकनिश्चयाऽव्यवहितोत्तरानुमितिः न हि ह्रदोवह्निमानित्याकारकानुमितिः, अपि तु घटाद्यनुमितिः, तत्र विरोधिविषयताप्रयुक्तः ह्रदविशेष्यकवह्निप्रकारकत्ववह्निव्याप्यधूमप्रकारकत्वयोरभावात्, तादृशवह्न्यभावविशिष्टह्रदत्वरूपतद्रूपवत्त्वस्य वह्न्यभाववद्ध्रदे सत्त्वात् भवति लक्षणसमन्वयः।

अत्रेयमाशङ्का जायते यत् "वह्न्यभाववान् ह्रदः" इत्याकारकनिश्चयानन्तरं "वह्निमद्ह्रदो वह्न्यभाववान्" इत्याकारकाऽऽहार्यज्ञानमुत्पद्यते। तदुपपत्तये ह्रदविशेष्यकवह्निप्रकारकत्वविशिष्टाऽनाहार्यज्ञानत्वमेव "वह्न्यभाववान्ह्रदः" इत्याकारकनिश्चयप्रतिबध्यतावच्छेदकं वाच्यं, तर्हि कथं वह्न्यभावविशिष्टह्रदत्वरूपबाधादौ लक्षणसमन्वयः करणीयम्, "वह्न्यभाववान्ह्रद" इति बाधज्ञानीयवह्न्यभावविशिष्टह्रदविषयितायाः ह्रदविशेष्यकवह्निप्रकारकत्वविशिष्टाऽनाहार्यज्ञानस्वरूपबाधनिश्चयप्रतिबध्यतावच्छेदकधर्माभावस्यैव प्रयोजकत्वात्, ह्रदविशेष्यकवह्निप्रकारकत्वघटितोभयाभावं प्रति अप्रयोजकत्वात् कथं विरोधिभूतबाधविषयिताप्रयोज्यत्वं तादृशोभयाभावे सम्भवति? इत्याकारकजिज्ञासा जायते। तत्र एवमुच्यते "यः विशिष्टाभावस्य प्रयोजको भवति सः विशेष्यवति वर्त्तमानस्य विशेषणाभावस्यापि प्रयोजकः" इति नियमस्य स्वीकृतत्वात् ह्रदविशेष्यकवह्निप्रकारकत्वविशिष्टाऽनाहार्य्यज्ञानत्वाभावप्रयोजिकायाः वह्न्यभावविशिष्टह्रदत्वावच्छिन्नस्वरूपविरोधिविषयितायाः विशेष्यीभूताऽनाहार्य्यज्ञानत्वविशिष्टघटाद्यनुमितौ वर्त्तमाने ह्रदविशेष्यकवह्निप्रकारकत्वरूपविशेषणाभावेऽपि प्रयोजकत्वमावश्यकं भवति। तादृशप्रकारकत्वघटितह्रदविशेष्यकवह्निप्रकारकत्वह्रदविशेष्यकवह्निव्याप्यधूमप्रकारकत्वोभयाभावेऽपि तादृशविरोधिविषयिता भवति उभयाभावप्रयोजिका, एवञ्च तद्रूपवत्त्वस्य वह्न्यभावविशिष्टह्रदे सत्त्वाद् भवति लक्षणसमन्वयः।

अत्रेयं जिज्ञासा जायते यत् प्रतिबन्धकतावच्छेदकीभूतविषयितैव प्रतिबध्यतावच्छेदकधर्माभावस्य प्रयोजिका भवति। एवञ्च आहार्य्यज्ञानस्य केनापि निश्चयेन अप्रतिबध्यत्वात् केवलमाहार्य्यज्ञानमात्रे वह्न्यभाववत्पर्वतविशेष्यकवह्निप्रकारकत्वस्य किञ्चिज्ज्ञानप्रतिबध्यतानवच्छेदकतया वह्निमत्पर्वतविषयिता निर्वह्निपर्वतविशेष्यकवह्निप्रकारकत्व-वह्निव्याप्यधूमप्रकारकत्वोभयाभावे वह्निमत्पर्वतविषयिताप्रयुक्तस्याभावात् पूर्वोक्ताश्रयासिद्धौ कथं लक्षणसमन्वयः कर्तुं शक्यते? इत्याकारकजिज्ञासायामेवमुच्यते- "यः व्यापकाभावस्य प्रयोजको भवति सः व्याप्याभावस्यापि प्रयोजकः"। एवञ्च वह्निमत्पर्वतरूपाश्रयासिद्धिनिश्चयप्रतिबध्यतावच्छेदकस्य पर्वतविशेष्यकवह्न्यभावप्रकारकत्वस्य वह्निमत्पर्वतरूपाश्रयासिद्धिविषयितायाः प्रयोजकतया पर्वतविशेष्यकवह्न्यभावप्रकारकत्वस्य च निर्वह्निपर्वतविशेष्यकवह्निप्रकारकत्वस्य व्यापकतया पर्वतविशेष्यकवह्न्यभावप्रकारकत्वस्य निर्वह्निपर्वतविशेष्यकवह्निप्रकारकत्वापेक्षया भवति व्यापकत्वम्। अतः तादृशव्यापकाभावप्रयोजकतायाः पर्वतविशेष्यकवह्न्यभावप्रकारकत्वाभावघटितोभयाभावप्रयोजकत्वं यदि वह्निमत्पर्वतरूपविषयितायां विद्यते तदा तद्व्याप्यभूतस्य निर्वह्निपर्वतविशेष्यकवह्निप्रकारकत्वस्याभावं प्रत्यपि प्रयोजकत्वमभ्युपेतमेव। अतः तदभावं प्रत्यपि वह्निमत्पर्वतरूपाश्रयासिद्धिविषयतायाः प्रयोजकत्वेन भवति लक्षणसमन्वयः।

यद्युक्तलक्षणे यद्रूपावच्छिन्नविषयकनिश्चयाऽव्यवहितोत्तरानुमितिसामान्ये इत्यनुक्त्वा यद्रूपावच्छिन्नविषयिताप्रयुक्तः प्रकृतपक्षविशेष्यकप्रकृतसाध्यप्रकारकत्वप्रकृतसाध्यहेतुप्रकारकत्वोभयाभावः तद्रूपवत्त्वमित्येव लक्षणं क्रियते तदा ह्रदो वह्निमान् एतत्स्थलीयबाधैकदेशे वह्न्यभावादावतिव्याप्तिः प्रसज्येत। वह्न्यभाववान् ह्रदः इत्याकारकज्ञानीयवह्न्यभावत्वावच्छिन्नविषयितायाः अपि ह्रदविशेष्यकवह्निप्रकारकज्ञानप्रतिबन्धकतावच्छेदकतया तत्प्रयुक्तत्वस्य ह्रदविशेष्यकवह्निप्रकारकत्वघटितोभयाभावप्रयोजकतायाः सत्त्वात् यद्रूपपदेन वह्न्यभावत्वस्यापि धर्त्तुं शक्यतया वह्न्यभावे अतिव्याप्तिः। "यद्रूपावच्छिन्नविषयकनिश्चयाऽव्यवहितोत्तरानुमितिसामान्ये" इत्यस्य लक्षणे प्रवेशे तु न बाधैकदेशेऽतिव्याप्तिः। यतो हि यदि यद्रूपपदेन वह्न्यभावत्वं गृह्यते तदा वह्न्यभावत्वावच्छिन्नविषयकनिश्चयाऽव्यवहितोत्तरानुमितिपदेन "ह्रदो वह्निमान् वह्निव्याप्य-धूमवांश्च" इत्याकारकानुमितेरपि धर्त्तुं शक्यतया तत्र तद्घटितोभयाभावे वह्न्यभावत्वावच्छिन्नविषयिताप्रयुक्तत्वविरहान्न दोषः।

अत्र लक्षणे ह्रदत्वेन वह्न्यभावविशिष्टह्रदत्वावच्छिन्ननिश्चयाऽव्यवहितोत्तरजायमाने ह्रदो वह्निमान्वह्निव्याप्यधूमवांश्चेत्याकारकानुमितौ प्रकृतपक्षविशेष्यकप्रकृतसाध्यप्रकारकत्वघटितोभयाभावप्रयोजकतायाः अभावात् वह्न्यभाववद्ध्रदादेः दोषत्वमेवानुपपन्नं स्यात्। अतः यद्विषयकनिश्चयत्वं परित्यज्य यद्रूपावच्छिन्नविषयकनिश्चयत्वमुपात्तम्। एवं वह्न्यभावविशिष्टह्रदत्वावच्छिन्नविषयकत्वस्य वह्न्यभावविशिष्टह्रदविशेष्यकह्रदो वह्निमान् न वेति संशयेऽपि विद्यमानतया तदुत्तरानुमितौ (पर्वतविशेष्यकवह्निप्रकारकत्वानुमितौ) ह्रदविशेष्यकवह्निप्रकारकत्व-वह्निव्याप्यधूमप्रकारकत्वोभयोरेवसत्त्वात् तत्र लक्षणसमन्वयो न स्यात्। अतः यद्रूपावच्छिन्नविषयकज्ञानमनिवेश्य यद्रूपावच्छिन्ननिश्चयस्योपादानं कृतम्। स चात्र निश्चयः पूर्ववदनाहार्य्याऽप्रामाण्यज्ञानाऽनास्कन्दितनिश्चयपरं बोध्यम्।

यदि च लक्षणघटकाऽव्यवहितत्वमनिवेश्य यद्विषयकनिश्चयोत्तरत्वमेव निवेश्यते तदा यद्दोषविषयकनिश्चयनाशानन्तरं पक्षविशेष्यकसाध्यव्याप्यहेतुप्रकारकानुमितिर्जन्यते, तत्र लक्षणसमन्वयो न स्यादत अव्यवहितत्वप्रवेशः। दोषविषयनिश्चयपूर्वमनुमितेरुत्पद्यमानतया पुनरव्याप्तिः स्यादतः लक्षणेऽव्यवहितोत्तरत्वनिवेशः। एवं बाधनिश्चयानन्तरमाहार्य्यसाध्यप्रकारकप्रत्यक्षस्योत्पद्यमानतया तत्रोभयाभावस्यासत्त्वेनाऽसम्भवः स्यादत अनाहार्य्येति ज्ञानविशेषणम्।

अत्र लक्षणे पक्षतावच्छेदकवैशिष्ट्यं साध्यतावच्छेदकवैशिष्ट्यं च वैज्ञानिकं न तु वास्तविकम्। अन्यथा काञ्चनमयपर्वतो वह्निमान् इत्यत्र काञ्चनमयत्वविशिष्टपर्वतस्याऽप्रसिद्धतया तत्र स्थलेऽव्याप्तिः स्यात्। इत्थम् "अत्र वदन्ति" कल्पोक्तं लक्षणं परिष्कृतं भवति।

केचन प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यप्रकारकसाध्यव्याप्यहेतुप्रकारकत्वावगाहिज्ञानस्य यद्विषयकं ज्ञानं विरोधिविषयकं भवति तत्त्वं हेत्वाभासत्वमिति स्वीकुर्वन्ति। ह्रदो वह्निमान् धूमादित्यत्र ह्रदविशेष्यकवह्निप्रकारकत्व-एवं वह्निव्याप्यहेतुप्रकारकत्वावगाहिज्ञानस्य यद्विषयकज्ञानसामान्यं प्रतिबन्धकं भवति तत्त्वं हेत्वाभासत्वम्। वह्न्यभाववद्ध्रदविषयकं ज्ञानं हि पक्षविशेष्यकसाध्यप्रकारकसाध्यव्याप्यहेतुप्रकारकज्ञानस्य विरोधिविषयकं भवति, तत्त्वस्य वह्न्यभाववद्ध्रदे सत्त्वाद् भवति लक्षणसमन्वयः।

अत्र यदि लक्षणे सामान्यपदं नोपादीयते तदा ह्रदो वह्निमान् धूमादित्यत्र घटेऽतिव्याप्तिः स्यात्। वह्न्यभाववान् ह्रदः घटश्चेत्याकारकज्ञानस्य ह्रदविशेष्यकवह्निप्रकारकानुमितिविरोधिविषयकत्वात्। अतः ज्ञानपदेन ज्ञानसामान्यप्रवेशः। एवञ्च घटादिविषयकस्य यस्य कस्यचित् समूहालम्बनज्ञानस्य विरोधिविषयकत्वेऽपि नातिव्याप्तिः।

हेत्वाभासस्य तृतीयलक्षणन्तु दोषस्यैवानुमितौ प्रतिबन्धकत्वं न तु दोषज्ञानस्य। इत्थं दोषस्यैवानुमितिप्रतिबन्धकत्वं येऽभ्युप-गच्छन्ति तेषां मते लक्षणान्तरमाह- "ज्ञायमानं सत् यदनुमितिप्रतिबन्धकं तत्त्वं हेत्वाभासत्वमि"ति। एतन्मते दोषज्ञानं नानुमितौ प्रतिब-न्धकं भवति, अपि तु ज्ञायमानस्य दोषस्यैव हेत्वाभासतामभ्युपगच्छन्ति। यथा ह्रदो वह्निमान् धूमादित्यत्र "वह्न्यभाववान्ह्रदः" इत्या-कारकबाधनिश्चयस्यानुमितिविरोधित्वेन ज्ञायमानं सत् बाधः भवति अनुमितेः प्रतिबन्धकः।

लक्षणञ्चेदमित्थं परिष्करणीयम्- तथा च "स्वावच्छिन्नविषयकत्वव्यापकं यत्प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिप्रकृतहेतुवैशिष्ट्यावगाहिज्ञानविरोधिविषयत्वमि"ति। एवञ्च घटत्वावच्छिन्नविषयकत्वस्याऽसमूहालम्बनज्ञानेऽपि विद्यमानत्वात् ह्रदादौ वह्निवैशिष्ट्याऽवगाहिज्ञानविषयविषयकत्वेन विरोधिविषयित्वाभावान्न घटेऽतिव्याप्तिः। घटत्वावच्छिन्नविषयकत्वस्य यथा दोषविषयितायां तथैव अप्रतिबन्धकीभूतघटविषयितायां सत्त्वात्। एवं प्रकृतपक्षविशेष्यकप्रकृतसाध्यप्रकारकप्रकृतसाध्यव्याप्यप्रकृतहेतुप्रकारकज्ञानविषयकग्रहप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकधर्मवत्त्वं हेत्वाभासत्त्वम् एवं लक्षणे कृतेऽपि निर्वह्निः पर्वतो वह्निमान् इत्यत्र वह्निमत्पर्वतरूपाश्रयासिद्धौ नाव्याप्तिः।

एवमेव यादृशपक्ष-साध्य-हेतौ यावन्तो दोषाः तावद्भिन्न-भिन्नत्वमपि लक्षणं कर्त्तुं शक्यते। यतो हि कुत्रचित् स्थले एक एव हेत्वाभासः, क्वचित् द्वौ, क्वचिच्च सर्वे हेत्वाभासाः। यथा – धूमवान् वह्नेरित्यत्र व्यभिचार एव दोषः, ह्रदो वह्निमान् जलात् इत्यत्र बाधः सत्प्रतिपक्षश्च, एवं वायुः गन्धवान् स्नेहादित्यत्र सर्वेऽपि हेत्वाभासारुद्भावनीया इति।

इत्थं हेत्वाभासज्ञानं पक्षप्रतिपक्षोपस्थापने सति वादिप्रतिवादिनां कृते परमावश्यकम्। यतो हि हेत्वाभासज्ञानं यदि प्रतिवादिनः न स्यात् तर्हि वादिना दुष्टहेतूपस्थापनद्वारा स्वसाध्यं साधिते सति तन्निराकरणं प्रतिवादिना कर्त्तुं न शक्यते। यदा च हेत्वाभासज्ञानं विद्यते तदा वाद्युक्तहेतौ दोषोद्भावनद्वारा तन्मतं प्रतिवादिना निराकर्त्तुं शक्यते। अथ च स्वयमपि हेत्वाभासप्रयोगः प्रतिवादिना न क्रियेत। अतः हेत्वाभासज्ञानमुभयोः कृतेऽतीवावश्यकम्। एतद्धेत्वाभासज्ञानञ्च वास्तविकयथार्थवस्तुनः निश्चयार्थेऽप्यपेक्षितः। अथ च हेत्वाभासज्ञानमन्तरा विजयो लब्धुं न शक्यते। अतः वादिनां प्रतिवादिनाञ्च कृते हेत्वाभासज्ञानमतीवावश्यकम्। तच्च हेत्वाभासज्ञानमनुमितावनुमितिकारणीभूते परामर्शे व्याप्तिज्ञाने च प्रतिबन्धकं भवति। अतः अस्य हेत्वाभासस्य ज्ञानं न केवलं तत्त्वज्ञानद्वारा अपवर्गस्यैव साधकमपि तु एतज्ज्ञानमन्तरा लोकव्यवहारोऽपि न हि सम्भवति। लौकिकव्यवहारसिद्धये वेदादीनां प्रामाण्यसाधने चास्य महानुपयोगः। अतएव हेत्वाभाससामान्यनिर्वचनप्रसङ्गे त्रिविधं लक्षणं हेत्वाभासस्य मणिकृता प्रदर्शितम्। लक्षणत्रयमिदं दोषज्ञानस्य प्रतिबन्धकतामभ्युपेत्यैव।

ज्ञायमानदोषस्य प्रतिबन्धकतामते तु तृतीयं यत् "ज्ञायमानं सत् यदनुमितिप्रतिबन्धकं तत्त्वमेव हेत्वाभासत्वम्"। अस्य अनुमितितत्कारणप्रतिबन्धकत्वे न हि कश्चन मतभेदः दार्शनिकमध्ये विद्यते। परन्तु तदवान्तरभेदप्रदर्शने तु मतभेदः दृश्यते। यतो हि वैशेषिकदर्शनेषु हेत्वाभासस्य त्रैविध्यं यदुक्तं वैशेषिकसूत्रे "अप्रसिद्धोऽनपदेशोऽसन् असन्दिग्धश्चाऽनपदेशः"[१९] इति, अथ च बौद्धदर्शनेऽपि हेत्वाभासस्य त्रैविध्यमेव प्रदर्शितम्। तथा चोक्तं धर्मकीर्तिना "असिद्धविरुद्धानैकान्तिकाः त्रयो हेत्वाभासाः"[२०] इति।

जैनानां मतेऽपि त्रयः हेत्वाभासाः स्वीकृताः वर्त्तन्ते। मीमांसकानां मतेऽपि त्रिविधाः हेत्वाभासाः वर्त्तन्ते यदुक्तं पार्थसारथिमिश्रेण शास्त्रदीपिकाग्रन्थे "असिद्धिः अनैकान्तिकत्वं बाधकत्वञ्चेति त्रयो हेतुदोषाः"[२१]। सांख्यानामप्यभिप्रायः तथैव। साहित्यिकैरपि त्रयः एव हेत्वाभासाः स्वीकृताः। यदुक्तं भामहेन काव्यालङ्कारे"हेतुस्त्रिलक्षणो ज्ञेयो हेत्वाभासो विपर्य्ययादि"ति। प्राभारकाः प्रकरणसमकालातीतयोः हेत्वाभासत्वं नाभ्युपगच्छन्ति। परन्तु न्यायदर्शने हेत्वाभासानां व्यभिचारविरोधसत्प्रतिपक्षासिद्धिबाधभेदेन पञ्चविधत्वं प्रतिपादितम्। तदुक्तं न्यायसूत्रकृता गौतमेन "सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीताः हेत्वाभासाः"[२२] इति। केशवमिश्रणापि तर्कभाषायां पञ्चैव हेत्वाभासाः स्वीकृताः। "असिद्धविरुद्ध-अनैकान्तिकप्रकरणसमकालात्ययापदिष्टभेदादि"ति।[२३] तत्रापि व्यभिचारः अनुमितिकारणस्य परामर्शस्य च प्रतिबन्धकः। स चायं व्यभिचारः साधारणासाधारणानुपसंहारिभेदेन त्रिविधः। तत्र सपक्षवृत्तित्वे सति विपक्षवृत्तित्वं साधारणत्वम्। यथा पर्वतपक्षकवह्निसाध्यकस्थले प्रमेयत्वहेतुः साधारणः। एवं सपक्षविपक्षोभयव्यावृत्तत्वमसाधारणत्वम्। यथा शब्दोऽनित्यः शब्दत्वा-दित्यत्र नित्यत्वनित्यत्वाऽभाववद्भ्यां व्यावृत्तः शब्दत्वहेतुः केवलं पक्षे शब्दे विद्यते। अतः तस्याऽसाधारणत्वम्। यत्र च सपक्षविपक्षयोरभावः अर्थात् यादृशस्थले सपक्षविपक्षयोरभावादन्वयदृष्टान्त-व्यतिरेकदृष्टान्तयोरभावः, तत्र भवत्यनुपसंहारित्वम्। यथा- सर्वं तुच्छं प्रमेयत्वादित्यत्र सर्वस्यापि पक्षत्वेन सपक्ष-विपक्षयोरप्रसिद्धत्वात् भवत्यनुपसंहारित्वम्। इत्थमनुमितिकरणविरोधित्वमेव व्यभिचारस्य भवति। एवं साध्यासमानाधिकरणं यो हि विरुद्धो हेतुः सो हि साध्यसामानाधिकरण्यरूपव्याप्तेरेव प्रतिबन्धकः। अतः तत्रापि नानुमितिप्रतिबन्धकत्वम्, किन्तु अनुमितिकारणीभूतव्याप्तिज्ञानप्रतिबन्धकत्वमेव। असिद्धिस्तु आश्रयासिद्धि-स्वरूपासिद्धि-व्याप्यत्वासिद्धिभेदेन त्रिविधतां प्राप्ता क्वचिदनुमितेः क्वचिच्च परामर्शस्यापि प्रतिबन्धिका भवति। सत्प्रतिपक्षस्तु विरोधिपरामर्शरूपः सन्नप्यनुमितेरेव प्रतिबन्धकः। एवं बाधोऽप्यनुमितिप्रतिबन्धक एव भवति। इत्थमनुमिति-तत्कारणप्रतिबन्धद्वाराहेत्वाभासज्ञानं खण्डने स्वमतस्थापने चातीवोपयोगी भवति। अतएव समेष्वपि दर्शनेषु हेत्वाभासस्य प्रतिष्ठास्तीति शम्।

**टिप्पणी**

१. सा.नि., चि.पृ.१
२. सा.नि. चि. पृ.१४
३. सा. नि. गा.- पृ.२४
४. तत्रानुमितिपदमनुमितिनिष्ठकार्यतानिरूपकसम्बन्धित्वेनानुमितितत्करणज्ञानपरमिति। सा. नि. दी., पृ.३१
५. सा. नि. दी. पृ. ४९
६. सा. नि. दी. पृ. १८
७. अत्र प्रमेयत्वाभावाऽप्रसिद्ध्या सिद्धान्तलक्षणव्यभिचारप्रदर्शनमाचार्यैः कृतम्।
८. सा. नि. चि. पृ. १४२
९. सा.नि.दी.पृ.१४२

१०. सा.नि.दी.पृ.१६२

११. सा.नि.गा.पृ.१६५

१२. सा.नि.गा.पृ.२०६-०८

१३. सा.नि.गा.पृ.२५९

१४. तथा च पक्ष-साध्य-साधनादिभेदेन लक्षणस्य भिन्नत्वमिष्टमेवेति भावः।

१५. सा.नि.दी.पृ.२६८

१६. सा.नि.गा.पृ.२९०

१७. सा.नि.गा.पृ.२९२

१८. तत्रैव- ३०१-०२

१९. वै.सू- ३-१-१५

२०. "असिद्धविरुद्धानैकान्तिकानामन्यतमस्योद्भावनं दूषणम्। बौद्धतर्कभाषायाम्। पृ.७९-८०

२१. शा.दी. पृ.२८९

२२. न्या.सू- १-२-४

२३. तर्कभाषायाम्- पृ.७७-७८

**सन्दर्भग्रन्थाः**


| | | |
|---|---|---|
| १. | सामान्यनिरुक्तिः | गङ्गेशोपाध्यायः, प.रूपनाथझा, मिथिलाविद्यापीठग्रन्थमाला, दरभङ्गा, १९७०. |
| २. | न्यायसूत्रम् | महर्षिगौतमः, डॉ.महेशझा, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, २०१३. |
| ३. | तर्कभाषा | केशवमिश्रः, प.श्रीरुद्रधरझा, चौखम्बा संस्कृत सीरीज, बनारस-१, १९५३. |
| ४. | तर्कसंग्रहः | श्रीमदन्नम्भट्टः, कृष्णवल्लभाचार्यः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, २०२२. |
| ५. | वैशेषिकदर्शनम् | महर्षिकणादः, डॉ. श्रीधर त्रिपाठी, मिथिलाविद्यापीठः, दरभङ्गा, १९८८. |
| ६. | शास्त्रदीपिका | पार्थसारथिमिश्रः, सुदर्शनाचार्य्यशास्त्री, विद्याविलासप्रेसः, काशी, वि.सं-१९६४. |
| ७. | काव्यालङ्कारः | आचार्य्यभामहः, डॉ.रामानन्दशर्मा, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, २०१३. |
| ८. | प्रमाणवर्त्तिकम् | आचार्य्यधर्मकीर्तिः, बौद्धभारती, वाराणसी, १९६८. |
| ९. | बौद्धतर्कभाषा | मोक्षाकरगुप्तः, डॉ.रघुनाथगिरिः, प्राच्यप्रकाशन, वाराणसी, १९६९. |